संस्कृत-सुधा

७



[आज्ञा सं० बो०-१२५५/१८-७ (६) ५६-५७, ६ जून, १६५६ के गजट भाग ४ में शिक्षा संचालक, उत्तर प्रदेश द्वारा कक्षा ७ के लिए स्वीकृत]

सतीश कुमार गुजराती

संस्कृत-सुधा

द्वितीयो भागः

Satish Kumar

लेखक
रामचन्द्र मालवीय
एम० ए०, एल० टी०, आचार्य

Satish

प्राप्ति स्थान
हिन्दी प्रचारक संस्थान
जून '६८ | वाराणसी-१ | [मूल्य : ४८ पैसे

पूर्व मुद्रित संख्या ७,२६,०००
७५,०००—जून, १९६८

प्रकाशक
हिन्दी प्रचारक पुस्तकालय
पिशाचमोचन
वाराणसी–१

मुद्रक
नया संसार प्रेस
भदैनी
वाराणसी–१

पाठ-सूची

क्रमांक	पाठ		पृष्ठ
१.	वन्दना — श्लोक	...	३
२.	परमेश्वरः	...	४
३.	उत्तमः छात्रः	...	६
४.	आश्रम-शोभा	...	८
५.	नीलः शृगालः	...	१०
६.	सिंह-शशक-कथा	...	१२
७.	कालिदासः	...	१४
८.	समस्यापूर्तिः	...	१६
९.	श्रमदानम्	...	१८
१०.	स्वागतोत्सवः	...	२०
११.	श्रीजगन्नाथ-मन्दिरम्	...	२२
१२.	नीतिवाक्यामृतम् — श्लोक	...	२५
१३.	भ्रष्टाचार-निवारणम्	...	२७
१४.	दीपमालिका	...	२९
१५.	पम्पा-वर्णनम्	...	३१
१६.	दरिद्रः सुदामा	...	३३
१७.	अशोकः	...	३६
१८.	शब्दमात्रान्न भेतव्यम्	...	३८
१९.	वाराणसी	...	४०
२०.	धेनुक-वधः	...	४२
२१.	लोभी नापितः	...	४४
२२.	कर्मण्येवाधिकारस्ते	...	४६
२३.	जीवेम शरदः शतम्	...	४८
२४.	चौर-चातुर्यम्	...	५१
२५.	पत्राणि	...	५४
२६.	कवीन्द्रो रवीन्द्रः	...	५७
२७.	सुवर्ण-हंस-कथा	...	५९
२८.	उपदेश-पीयूषम् — श्लोक	...	६०
२९.	व्याकरणम्	...	६३
३०.	कारक-प्रकरणम्	...	७६

त्रैमासिक परीक्षा
अर्द्धवार्षिक परीक्षा
वार्षिक परीक्षा

—:o:—

वन्दना

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥१॥

गिरीशं गणेशं गले नीलवर्णं
गवेन्द्राधिरूढं गुणातीतरूपम् ।
भवं भास्वरं भस्मना भूषिताङ्गं
भवानीकलत्रं भजे पञ्चवक्त्रम् ॥२॥

नमस्ते नमस्ते विभो विश्वमूर्त्ते
नमस्ते नमस्ते चिदानन्दमूर्त्ते ।
नमस्ते नमस्ते तपोयोगगम्य
नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥३॥

प्रभो शूलपाणे विभो विश्वनाथ
महादेव शम्भो महेश त्रिनेत्र ।
शिवाकान्त शान्त स्मरारे पुरारे
त्वदन्यो वरेण्यो न मान्यो न गण्यः ॥४॥

—: ० :—

ब्रह्मदत्तः—सखे रामदत्त ! परमेश्वरः परमेश्वरः भगवान् भगवान् इति प्रतिक्षणं त्वं वदसि, ननु पृच्छामि कोऽयं परमेश्वरः ? को वाऽयं भगवान् ?

रामदत्तः—अतिगम्भीरोऽयं ते प्रश्नः। कठिनम् अस्य प्रतिवचनम्, तथापि यत् मे गुरुमुखाद् विदितमस्ति तत् तुभ्यं यथाशक्ति निवेदयामि। त्वाम् अहं पृच्छामि किञ्चित् प्रथमम्, किमिदं ते वस्त्रं स्वयम् उत्पन्नम् आहोस्वित् वर्त्तते कश्चित् अस्य कर्त्ता ?

ब्रह्मदत्तः—कथं स्वयम् उत्पन्नम् ? वर्त्तते तन्तुवायः अस्य कर्त्ता।

रामदत्तः—अथ यदिदं ते कनकाङ्गुलीयकं किमिदं स्वयमुत्पन्नम्, उताहो अस्यापि कश्चित् कर्त्ता ?

ब्रह्मदत्तः—वर्त्तते अस्यापि कर्त्ता स्वर्णकारः। ततः किम् ?

रामदत्तः—तत् इदं भवति, यत् सर्वस्यापि कार्यस्य कश्चित् कर्त्ता भवतीति। नैतदेवम् ?

ब्रह्मदत्तः—एवमेव, कः सन्देहोऽत्र ?

रामदत्तः—अथ यदिदं जगद्रूपं कार्यम्, नूनम् अस्यापि कश्चित् कर्त्ता वर्तते। तत् किमेषः कर्त्ता त्वं वा, अहं वा, अयं वा, असौ वा, अन्यो वा कश्चित् ?

ब्रह्मदत्तः—हन्त भो नैतादृशः कश्चित् तस्य कर्त्ता संभवति। न पुनरवगच्छामि कः स इति।

रामदत्तः—अयम् एव ईश्वरः इति वा, भगवान् इति वा प्रसिद्धः। एष एव विश्वं रचयति, पालयति, संहरति च।

ब्रह्मदत्तः—कुत्र तिष्ठति परमेश्वरः ?

रामदत्तः—स हि सर्वत्र सर्वदा तिष्ठति ।

प्रह्लादत्तः—यदि सर्वत्र वर्त्तते परमेश्वरः, तदा कथं न वयं पश्यामः परमेश्वरं भगवन्तम् ?

रामदत्तः—भद्र ! पाषाणमये आकरे बहुमूल्यं मणिं मणिकारा एव पश्यन्ति, मादृशास्तु आकरं पाषाणमात्रम् एव पश्यन्ति । एवं दुर्लभदर्शनं भगवन्तं ये ध्यानयोगेन द्रष्टुं चेष्टन्ते, ये च सदा सेवन्ते भक्ताः ते एव तं द्रष्टुं समर्थाः भवन्ति । ईश्वरः कुत्र तिष्ठति अस्मिन् विषये गीतायां श्रीकृष्णेनोक्तम्—

"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।"

अभ्यास

प्रतिवचनम्, यथाशक्ति, आहोस्वित्, तन्तुवायः,
अवगच्छामि, पाषाणः, आकरः, चेष्टते ।

संस्कृत में अनुवाद करो—

१. यह प्रश्न बड़ा कठिन है ।
२. सुनार अँगूठी बनाता है और कुम्हार बर्तन ।
३. ऐसा कौन है जो मुझको हरावे ।
४. मुझको इसका उत्तर दो ।
५. शिल्पी पत्थर की मूर्तियाँ बनाता है ।
६. खान से हीरा निकलता है ।
७. मैं जानता हूँ वह भागने की चेष्टा नहीं करता ।
८. जुलाहा कपड़ा बुनता है (वयति) ।
९. वह स्वयं आया है अथवा बुलाने से ?

कर्त्ता कर्त्तारौ कर्त्तारः प्रथमा
कर्त्तारम् कर्त्तारौ कर्तॄन् द्वितीया
शेष रूप लिखो

उत्तमः छात्रः



उत्तमः छात्रः ब्राह्मे मुहूर्ते प्रबुध्यते। प्रबुध्य च सः प्रथमं मातापित्रोः पादौ स्पृशति। पितरौ च तस्मै शुभाम् आशिषं प्रयच्छतः। अनन्तरं स्नानादिकम् आवश्यकं कर्म कृत्वा सः अध्ययनाय उपविशति। सः प्रत्यहं समये पाठशालां गच्छति। वेलातिक्रमं कदापि न करोति। पाठशालां प्राप्य सः सहपाठिभिः सह प्रेम्णा मिलति, सूनृतया च वाचा व्यवहरति। कलहेन विवादेन वा तस्य किमपि प्रयोजनं न भवति। यदा घण्टा नदति तदा सः सखिभिः सह कक्षां प्रविशति। तत्र स्थानाय कलहं न करोति किन्तु शान्त्या स्वासनम् उपविशति। गुरुः तं यान् प्रश्नान् पृच्छति सः तेषां सम्यक् उत्तरं ददाति, गुरोः आदेशान् च पालयति।

प्रकृत्या साधुस्वभावः सः नेत्राभ्यां हीनान् श्रोत्रेण बधिरान् पादेन खञ्जान् वा बालकान् दृष्ट्वा न हसति नाक्षिपति च। सः गर्वेण युक्तो न भवति। धनेन हीनोऽपि सः परेषां धनाय वस्तुभ्यो वा न स्पृहयति। ऋणग्रहणं तस्मै न रोचते अतएव सः कस्मैचित् किमपि न धारयति। मित्रेभ्यः सः कदापि न क्रुध्यति नैव द्रुह्यति नापि ईर्ष्यति असूयति वा। सः कंचन बालकं तृणाय न मन्यते। सः आतुरेभ्यः दानं ददाति। "द्रोहः कष्टाय कल्पते परोपकारः पुण्याय" इति सः सम्यग् विजानाति। मध्याह्निके अवकाशे सः पाठशालायाः बहिः न गच्छति किन्तु तत्रैव सहपाठिभिः सह क्रीडति।

सः पापाद् विरमति किन्तु धर्मात् स्वाध्यायाद् वा न प्रमाद्यति। विपत्तेः भयं तस्य हृदये नोत्पद्यते। शास्त्रे तस्य व्यसनं यशसि च अभिरुचिः। एषां गुणानां हेतोः गुरवः छात्राश्च तस्मिन् स्निह्यन्ति। उत्तमः छात्रः परीक्षायां सर्वेषु छात्रेषु प्रथमः भवति।

अभ्यास

इस पाठ में चतुर्थी तथा पञ्चमी विभक्ति से युक्त शब्दों का निर्देश करो और इन विभक्तियों के प्रयोग का कारण बताओ।

वेलातिक्रमम्, सूनृतया, उपविशति, खड्गान्,
स्पृहयति, द्रुह्यति, ईर्ष्यति, असूयति, व्यसनम्।

संस्कृत में अनुवाद करो—

१. बिना परिश्रम के विद्या नहीं आती।
२. हम लोग आखों से देखते और कानों से सुनते हैं (शृणुमः)
३. युधिष्ठिर भाइयों के साथ वन गये।
४. राजा भिक्षुओं को दान देता है।
५. मुझे ऋण लेना अच्छा नहीं लगता।
६. तिल से तेल होता है।
७. यह छात्रों में श्रेष्ठ है।

मोहनः—सखे कृष्णवल्लभ ! पश्यसि इदं तद् आश्रमस्थानम् ?

कृष्णवल्लभः—कथं न पश्यामि । पश्यामि च नन्दामि च । अय मोहन ! के पुनरेते क्रीडन्ति ?

मोहनः—आश्रमवटवः एते ! अहो प्रियम् एषां दर्शनम् । स्वभाव-रमणीयो वेषः, विनयमधुरश्च सरलः स्वभावः । सर्वथा सफलम् इदानीं मे नयनम् । पश्य, कथम् एते खेलन्ति । एको धावति अपरोऽनुधावति । एकः पतति अन्ये हसन्ति । कश्चिच्चलति, कश्चित्तिष्ठति, एके भ्रमन्ति, अपरे गायन्ति । अहो ! अतिमनोहरं दर्शनम् । अग्रतस्तावद् गच्छावः । जिघ्रसि कृष्णवलभ ! कथम् एष सुरभिः होमगन्धः सर्वतः उद्गच्छति ? एते हरिणशिशवः निरुद्वेगाः पर्यटन्ति, धावन्ति, क्रीडन्ति च । एते मयूराः नृत्यन्ति । इमाश्चात्र होमगावः पर्यटन्ति । एते शुकशावकाः अन्ये च अनेके विहङ्गमा कूजन्ति ।

कृष्णवल्लभः—इतोऽपि इयं रमणीया तरुपङ्क्तिः उल्लसति । मनोरमाः लताश्च वृक्षैः आवेष्टिताः विलसन्ति । एतानि कुसुमानि प्रस्फुटितानि येषु मधुलोलुपाः मधुकराः गुञ्जन्ति ।

मोहनः—कृष्णवल्लभ ! अत्रापि अवलोकयावः । एते परिभ्रमन्ति ब्रह्मचारिणः । आहरन्ति चैते कुशं, पुष्पं, समिधश्च । एते हि परिचरन्ति आचार्यान् । आचरन्ति सदाचारान् न तु स्वेच्छाचारान् । त्यजन्ति अविनयम् न तु विनयम् । परिहरन्ति हिंसां न तु दयाम् । वदन्ति सत्यं न तु अनृतम् । एते केचिद् ब्रह्मचारिणः वेदान् पठन्ति । केचिच्च अन्यानि शास्त्राणि अभ्यस्यन्ति ।

कृष्णवल्लभ :—सखे मोहन ! कश्चिन्महाभागः आवाम् आह्वयति । तदिमौ गच्छावः । किं कथयसि भगवन् ?

ब्रह्मचारी—युवाम् अतिथी, तत् ग्रहणीयोऽयं सत्कारः ।

उभौ—साधु भगवन् साधु । नूनं प्रभूतं नः पुण्यं, यद् भवादृशा अपि अस्मान् अनुग्रहणन्ति ।

[आतिथ्यं गृहीत्वा उभौ स्वगृहं प्रति प्रस्थितौ]

अभ्यास

उद्गच्छन्ति, पर्यटन्ति, विहङ्गमाः कूजन्ति, आवेष्टिताः (समित्, समिधौ, समिधः; समिधम्) आह्वयति, (अतिथिः, अतिथी, अतिथयः) सुरभिः । अनुवाद करो—

देखो कैसा सुहावना आश्रम है । मुनिबालक खेल रहे हैं । मृग और गायें निर्भय घूम रही हैं । होम हो रहा है । उसकी सुगन्ध आ रही है । मोर नाच रहे हैं । चिड़ियाँ चहचहा रही हैं । होम की लकड़ियाँ धूप में सूख रही हैं (आतपे शुष्यन्ति) । अतिथियों का स्वागत हो रहा है ।

सखा सखायौ सखायः प्रथमा
सखायाम्, सखायौ सखीन् द्वितीया

शेष रूप लिखो ।

नीलः शृगालः

कश्चित् शृगालः स्वेच्छया नगरस्य समीपे भ्राम्यन् कस्यचिद् रजकस्य गृहं प्राविशत्। तत्र सः नीलीभाण्डे अपतत् येन तस्य वर्णः नीलः अभवत्। ततः वनं गत्वा आत्मानं नीलवर्णम् अवलोक्य अचिन्तयत्—अहम् इदानीम् उत्तमवर्णः। तत् स्वकीयम् उत्कर्षं कथं न साधयामि ? इति आलोच्य शृगालान् आहूय तेन उक्तम्—अहं भगवत्या वनदेवतया स्वहस्तेन अरण्यस्य राज्ये अभिषिक्तः। अस्मिन् अरण्ये मम आज्ञया व्यवहारः कार्यः। शृगालाः तं विशिष्टवर्णम् अवलोक्य प्रणम्य अवदन्—'यथा आज्ञापयति देवः।'

क्रमेण सर्वेषु वनवासिषु पशुषु तस्य स्वामित्वम् अभवत्। ततः व्याघ्रसिंहादीन् उत्तमान् सेवकान् प्राप्य नीलवर्णः स्वज्ञातीन् अनादृतवान्। अथ नीलवर्णस्य अनादरेण दुःखितान् शृगालान् अवलोक्य केनचिद् वृद्धेन शृगालेन उक्तम्—"मा विषादं कुरुत। यद् अनेन मूर्खेण नीतिज्ञाः वयं स्वसमीपाद् बहिष्कृताः तद् यथा अयं नश्यति तथा कर्तव्यम्। तथा च अद्य सन्ध्यासमये सर्वे यूयं सहैव शब्दं करिष्यथ। ततः तं शब्दं श्रुत्वा जातेः स्वभावात् नीलवर्णः अपि शब्दं करिष्यति।"

ततः सन्ध्यायां तथा कृते सति नीलवर्णस्य शब्दात् तं शृगालं परिज्ञाय व्याघ्रः तं हतवान्।

यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः।
श्वा यदि क्रियते राजा स किं नाश्नात्युपानहम्॥

अभ्यास

रजकस्य, उत्कर्षम्, अवलोक्य, आहूय,
अनाहूतवान्, विषादम्, दुरतिक्रमः, उपानहम्।

इन शब्दों का प्रयोग कर निम्नांकित प्रश्नों के उत्तर संस्कृत में दो—

१. शृगालः कुत्र प्राविशत् ?

२. आत्मानं नीलवर्णं विलोक्य शृगालः किम् अचिन्तयत् ?

३. वृद्धेन शृगालेन किमुक्तम् ?

४. नीलवर्णः स्वोत्कर्षसाधनार्थं किम् अकरोत् ?

५. नीलवर्णः कान् अनाहूतवान् ?

६. कः दुरतिक्रमः ?

७. राजा अपि श्वा किम् अश्नाति ?

सिंह-शशक-कथा



अभूत् क्वापि वने सिंहः एकवीरोऽपराजितः ।
स च यं यं ददर्शात्र सत्त्वं तं तं न्यपातयत् ॥१॥
ततः सोऽभ्यर्थितः सर्वैः संभूयात्र मृगादिभिः ।
आहाराय तवैकैकं प्रेषयामो दिने दिने ॥२॥
सर्वान् नो युगपद् हत्वा स्वार्थहानिं करोषि किम् ।
इति तद्वचनं सिंहः स तथेत्यन्वमन्यत ॥३॥
ततः प्राणिनमेकैकं तस्मिन्वहमत्ति सः ।
एकदा शशकस्यागाद् वार एकस्य तत्कृते ॥४॥
सर्वैः सम्प्रेषितो गच्छन् शशो धीमान् अचिन्तयत् ।
स धीरो यो न संमोहम् आपत्कालेऽपि गच्छति ॥५॥
उपस्थितेऽपि मृत्यौ तद् युक्तिं तावत् करोम्यहम् ।
इत्यालोच्य स तं सिंहं विलम्ब्य शशकोऽभ्यगात् ॥६॥
आगतं तु विलम्बेन केसरी निजगाद सः ।
अरे वेला व्यतिक्रान्ता ममाहारे कथं त्वया ॥७॥
वधादप्यधिकं किं वा कर्त्तव्यं ते मया शठ ।
इत्युक्तवन्तं तं सिंहं प्रह्वः स शशकोऽब्रवीत् ॥८॥
न मे देवापराधोऽयं स्ववशो नाहमद्य यत् ।
मार्गे विधार्य सिंहेन द्वितीयेनोज्झितश्चिरात् ॥९॥

तच्छ्रुत्वास्फाल्य लाङ्गूलं सिंहः क्रोधारुणेक्षणः ।
सोऽब्रवीत् को द्वितीयोऽसौ सिंहो मे दर्श्यतां त्वया ॥१०॥

आगत्य दृश्यतां देवेत्युक्त्वा सोऽपि निनाय तम् ।
तथेत्यन्वागतं सिंहं दूरं कूपान्तिकं शशः ॥११॥

इहान्तःस्थं स्थितं पश्येत्युक्तस्तत्र च तेन सः ।
शशकेन, क्रुधा गर्जन् सिंहोऽन्तःकूपमैक्षत ॥१२॥

दृष्ट्वा स्वच्छे च तोये स्वं प्रतिबिम्बं, निशम्य च ।
स्वगर्जित-प्रतिरवं मत्वा तत्रान्यगर्जितम् ॥१३॥

प्रतिसिंहं स कोपेन तद्वधाय मृगाधिपः ।
आत्मानमक्षिपत् कूपे मूढोऽत्रैव व्यपादि च ॥१४॥

शशः स प्रज्ञयोत्तीर्य मृत्योरुत्तार्य चाखिलान् ।
मृगान् गत्वा तदाख्याय स्ववृत्तं ताननन्दयत् ॥१५॥

एवं प्रज्ञैव परमं बलं न तु पराक्रमः ।
यत्प्रभावेण निहतः शशकेनापि केसरी ॥१६॥

अभ्यास

१. निम्नांकित शब्दों के संस्कृत में पर्यायवाची शब्द लिखो ।

सत्त्वम्, संभूय, आहाराय,
युगपत्, श्रीमान्, केसरी, निजगाद,
प्रह्वः, उज्झितः, तोये

२. इस कथा का गद्य रूपान्तरण करो ।



अस्य पुस्तकस्य प्रारम्भे लिखितः प्रार्थनायाः प्रथमः श्लोकः कालिदासेन विरचितः अस्ति । अयं रघुवंशस्य प्रथमः श्लोकः । कालिदासः रघुवंशम्, कुमारसम्भवम्, मेघदूतम्, इति त्रीणि काव्यानि, तथा अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम् इति त्रीणि नाटकानि च व्यरचयत् । नाटकेषु शाकुन्तलम् अतीव श्रेष्ठं सुप्रसिद्धं च । सर विलियम जोन्स नामकः विदेशीयः विद्वान् अस्य नाटकस्य आङ्ग्लभाषायाम् अनुवादम् अकरोत् । इदम् अनुवादं पठित्वा विदेशीयाः विद्वांसः कालिदासस्य प्रतिभया अत्यन्तं प्रभाविताः अभवन् । अनेन अनुवादेन महाकवेः विशदं यशः विदेशेषु प्रासरत् ।

यद्यपि भारवि-माघ-श्रीहर्षादयः अनेके महाकवयः संस्कृते सुन्दराणि महाकाव्यानि अलिखन् तथापि कालिदासस्य रचनासु विद्वांसः अपूर्वम् एव आनन्दं लभन्ते । अस्य काव्य-रचना सर्वत्र सरला मधुरा मनोहारिणी च । उपमायाः प्रयोगे कालिदासः अत्यन्तं निपुणः अद्वितीयश्च कविः अस्ति ।

अयं भारते सर्वत्र भ्रमणं कृत्वा भारतीयान् ग्रन्थान् सम्यक् पठित्वा च स्वीयान् ग्रन्थान् अलिखत् इति अस्य ग्रन्थेभ्यः ज्ञायते । कुमारसम्भवे हिमालयवर्णनम्, मेघदूते उज्जयिनीवर्णनम्, रघुवंशे च प्रयागादिवर्णनम् अतीव रमणीयम् । महर्षेः कण्वस्य आश्रमात् पत्युः दुष्यन्तस्य गृहं प्रति शकुन्तलायाः प्रस्थानस्य प्रसङ्गे शाकुन्तले नाटके कविः यान् चतुरः श्लोकान्

अलिखत् तान् पठित्वा श्रुत्वा च साधारणस्य अपि जनस्य नेत्रे अश्रुभिः पूरिते भवतः ।

अयं महाकविः कदा कस्मिन् देशे कुले वा जन्मग्रहणम् अकरोत्, का चास्य माता, कश्च पिता, के च पुत्रादयः, कश्च गुरुः, एतेषु विषयेषु अद्यापि निश्चयो न जातः ।

संस्कृतं सम्यक् पठित्वा यूयम् अस्य ग्रन्थान् अवश्यं पठत !

अभ्यास

त्रीणि, विंशदम्, प्रासरत्

त्रयः त्रीन्, त्रिभिः, त्रिभ्यः, त्रयाणाम्, त्रिषु—पुँल्लिङ्ग

तिस्रः, तिस्रः, तिसृभिः, तिसृभ्यः तिसृभ्यः, तिसृणाम्, तिसृषु—स्त्रीलिङ्ग

त्रीणि त्रीणि—नपुंसक लिङ्ग

(शेष पुंल्लिङ्गवत्)

संस्कृत में अनुवाद करो :—

१. कालिदास ने तीन नाटक बनाये । उनका सुयश सर्वत्र फैल गया ।

२. तीन लड़के खेल रहे हैं ।

३. तीन लड़कियाँ गा रही हैं ।

४. तीनों लड़कों के कपड़े मैले हैं और लड़कियों के साफ हैं ।

५. कालिदास ने भारत में सर्वत्र भ्रमण किया ।

६. शाकुन्तल नाटक बहुत मनोहर है ।



इतिहासे सुप्रसिद्धः भोजराजः मालवदेशस्य धारानगर्यां राज्यम् अकरोत्। तस्य सभायां बहवः विद्वांसः कवयश्च आसन्। तेषु कालिदासः अपि एकः अभवत्। राजा कवीनां काव्यानि श्रुत्वा तेभ्यः बहु द्रव्यं कदाचिच्च प्रत्यक्षरं लक्षम् अददात्।

एकदा एका युवतिः राज्ञः स्नानाय सुवर्णस्य घटे जलम् आनयन्ती आसीत्। सहसा तस्याः हस्तात् कलशः अपतत्। पतितः कलशः सोपानानां परम्परासु टं टं टं शब्दम् अकरोत्। अथ सभायाम् आगत्य राजा कालिदासं प्राह—सुकवे, समस्याम् एकां पूरय—

टटं टटंटं टटटं टटंटम्—इति।

तत् श्रुत्वा कालिदासः सद्य एव तां समस्याम् एवम् अपूरयत्—

राज्याभिषेके जलमानयन्त्याः
हस्ताच्च्युतो हेमघटो युवत्याः।
सोपानमार्गे च करोति शब्दं
टट टटंटं टटटं टटंटम्।

कवेः परोक्ष ज्ञानेन सन्तुष्टः राजा कालिदासाय प्रचुरं द्रव्यं दत्तवान्।

अन्यच्च,

एकदा चत्वारः वैदिकाः पुरस्कारस्य लोभेन राजानां भोजं द्रष्टुम् ऐच्छन्। किन्तु ते कवितां कर्तुं न जानन्ति स्म। भगवती सरस्वती प्रसन्ना भूत्वा अस्मभ्यं कवित्वशक्तिं दास्यति इति निश्चित्य ते वैदिकाः देव्याः मन्दिरम् अगच्छन्।

तत्र देव्याः पूजां स्तुतिञ्च कृत्वा ते काव्यरचनायै एकत्र उपाविशन्। तेषु एकः अपठत्—

भोजनं देहि राजेन्द्र,

अनन्तरम् अन्यः अपठत्—

घृत-सूप-समन्वितम्।

अस्य अग्रे तेषां वाणी रुद्धा अभवत्। अस्मिन् अनन्तरे कालिदासः अपि तत्र देव्याः दर्शनाय आगच्छत्। अथ ते वैदिकाः कवितायाः पूर्त्तये कालिदासं प्रार्थयन्। प्रार्थितः कालिदासः सद्य एव तेषां रचनाम् अपूरयत्।

माहिषं च शरच्चन्द्रचन्द्रिकाधवलं दधि।

प्रसन्नाः वैदिका राज्ञः समीपम् आगत्य श्लोकम् इमम् अपठन्। पूर्वार्धे परार्धे च महद् अन्तरं ज्ञात्वा राजा तान् अस्य रहस्यम् अपृच्छत्। राज्ञा पृष्टाः ते वैदिकाः राज्ञे सत्यं निवेद्य पुरस्कारं लब्ध्वा गृहान् अगच्छन्। कालिदासश्च राज्ञा बहुसम्मानितः अभवत्।

अभ्यास

प्रत्यक्षरम् आनयन्ती, च्युतः, प्रचुरम्,

पुरस्कारः, उपाविशन्, सूपः, समन्वितम्।

'तेषु कालिदासः—अभवत्।' यहाँ तत् शब्द में सप्तमी होने का और 'राज्ञः स्नानाय' यहाँ स्नान में चतुर्थी का कारण बताओ।

अनुवाद करो—

१. मिठाई लाती हुई लड़की गिर पड़ी। पिता ने उसे उठाकर पैसा दिया।
२. इस पुस्तक का मैंने एक-एक अक्षर पढ़ा है।
३. लड़के के हाथों से घड़ा गिरा और टूट गया।
४. राम के पास बहुत सी पुस्तकें हैं।
५. मैं कक्षा में प्रथम उत्तीर्ण हुआ हूँ।
६. मुझे इनाम मिलेगा।
७. वह दाल के साथ भात खाता है।

सन्धि-युक्त करो—

अपि + एक, आनयन्ती + आसीत्, एकत्र + उपाविशन्, तेषु + एकः।



प्रथमः—सखे, पश्य एषां बालकानां श्रमदानम्? इमे हि अद्य स्वकीयाम् अध्ययनकक्षां स्वयमेव सुधया धवलितां कर्तुमिच्छन्ति। एतदर्थम् एते अद्य रविवासरे अवकाशदिनेऽपि विद्यालयम् आगताः। अत्र एकः कूपात् जलम् निःसारयति, अन्यः तेन पात्रं पूरयति। अथ अपरः घटे चूर्णं प्रक्षिपति द्वितीयश्च दण्डेन परिचालयति। कश्चन काष्ठसोपानम् आनयति, कश्चन मार्जन्या भित्तीः मार्जयति। कश्चन सोपानम् आरुह्य कूर्चिकया लेपनं करोति। अहो एषाम् उत्साहः।

द्वितीयः—अथ किमिदं श्रमदानं नाम? श्रुतं मया—वस्त्रदानं द्रव्यदानम् अन्नदानं गवादिदानञ्च किन्तु अद्य भवन्मुखात् नवीनं श्रमदानं शृणोमि। तद् विस्तरेण अस्य अभिप्रायं वर्णयतु भवान्।

प्रथमः—किं त्वं न जानासि अस्माकं देशः कियान् समृद्धः। अस्य भूमिः कियती उर्वरा। अत्रत्याः नद्यः अगाधजलाः। पर्वताः सुवर्णादि बहुमूल्यखनिजैः पूर्णाः। समुद्राः रत्नाकराः, काननादि च काष्ठैः फलैः ओषधिभिश्च पूर्णानि। एवं समृद्धेऽपि देशे निवसन्तः भारतीयाः वयं कष्टेनैव जीवनं यापयामः। किन्तु बहुभिः साधनैः विहीना अपि विदेशीयाः सुखेन निवसन्ति। किं कदापि भवता अस्याः दुरवस्थायाः कारणं चिन्तितम्। एतस्याः कारणं केवलम् आत्मनि अविश्वासः परमुखावलोकनञ्च। यदा अस्माकं देशः परतन्त्रः आसीत् तदा परवशाः वयम् उन्नत्यै विवशाः आस्म;

किन्तु यदि वयं साम्प्रतम् अपि स्वावलम्बिनो न भवामः तर्हि देशस्य उन्नतिः कथमपि भवितुं न अर्हति। श्रमं प्रति अस्माकं निष्ठा भवेत्, श्रीमन्तोऽपि श्रमिकाः भवेयुः तथा अयं श्रमिकः अहम् अस्य स्वामी, सर्वं श्रमस्य कार्यं मूल्येनैव संभवति इत्याद्याः विषमाः भावनाः दूरीभवेयुः। सर्वे च वयं देशस्य उन्नत्यै श्रमिकाः स्वे स्वे कर्मणि संलग्नाश्च भवेम, अयमेव श्रमदानस्य अभिप्रायः।

द्वितीयः—शोभनम्। अस्ति मम ग्रामे एकस्य कूपस्य आवश्यकता, तद्, अहम् अपि अद्यैव ग्रामीणैः बन्धुभिः सह परामर्शं कृत्वा तेषां सहयोगेन स्वयमेव कूपखनने प्रवृत्तो भविष्यामि।

अभ्यास

सुधया, धवलिताम्, निःसारयति, मार्जन्या,
भित्तीः, उर्वरा, काननानि, यापयामः।

अनुवाद करो—

(१) सुधा (चूना) से धवलित घर को 'सौध' अथवा 'प्रासाद' कहते हैं। (२) तीन लड़कियाँ कुएँ से पानी निकालती हैं। (३) दो लड़कियाँ झाड़ू से घर साफ करती हैं। (४) दीवाल पर छिपकली (पिल्ली) दौड़ती है। (५) इस खेत की मिट्टी उपजाऊ है। (६) योगी जंगलों में अपना समय व्यतीत करते हैं।

स्वागतोत्सवः

रमेशः—सुरेश ! कुत्र गच्छसि ?

सुरेशः—विद्यालयं गच्छामि ।

रमेशः—अद्य अवकाशस्य दिने किमर्थं विद्यालयं गच्छसि ?

सुरेशः—अद्य उत्सवः वर्तते । सर्वे छात्राः तत्र उपस्थिताः भविष्यन्ति ।

रमेशः—कीदृशः उत्सवः अस्ति ?

सुरेशः—अद्य अस्माकं विद्यालये मुख्यमन्त्रिणः स्वागतं भविष्यति ।

रमेशः—तत्र कः कार्यक्रमः अस्ति ?

सुरेशः—प्रथमं विद्यालयद्वारे छात्र-सैनिकाः अभिवादनं करिष्यन्ति । ततः विद्यालयस्य महाकक्षे सभा भविष्यति । तत्र मम कक्षायाः पञ्च विद्यार्थिनः संस्कृते स्वागत-गानं करिष्यन्ति । अनन्तरं माल्यार्पणं भविष्यति । तत्पश्चात् प्रधानाचार्यः अभिनन्दनपत्रं पठिष्यति । अन्ते मुख्यमन्त्रिणः भाषणं भविष्यति ।

रमेशः—कार्यक्रमे तव अपि भागः अस्ति न वा ?

सुरेशः—आम्, अस्ति । अहम् अपि छात्र-सैनिकेषु स्वागतगायकेषु च सम्मिलितः भविष्यामि ।

रमेशः—किम् अहम् अपि चलितुं शक्नोमि ?

सुरेशः—आम्—शीघ्रं चल । विलम्बं मा कुरु ।

अभ्यास

महाकक्षे, माल्यार्पणम्

संस्कृत में उत्तर दो—

(१) अवकाशेऽपि सुरेशः विद्यालयं कथम् अगच्छत् ?

(२) उत्सवः किमर्थम् अभवत् ?

(३) उत्सवे कीदृशः कार्यक्रमः आसीत् ?

(४) आयोजने सुरेशः किम् अकरोत् ।

(५) माल्यदान शब्दस्य कोऽर्थः ?

श्री जगन्नाथ मन्दिरम्



विनोदः—सखे ! अभिवादये ।

नरेशः—वन्दे । किमस्ति नूतनं किञ्चित् । अतीव प्रफुल्लं पश्यामि त्वाम् अद्य ।

विनोदः—अस्ति किञ्चित् नूतनम् एव । अस्मिन् एव सप्ताहे मम पिता पुरीं गमिष्यति ।

नरेशः—पुरीक्षेत्रम् ? किं भगवतः जगन्नाथस्य दर्शनाय ? अहो रमणीयं तत् तीर्थम् ! समुद्रतटे वर्तमानम् इदं स्थानं न केवलं मनोहरं किन्तु स्वास्थ्य-लाभाय अपि वरम् । किं तव पिता त्वाम् अपि तत्र नेष्यति ?

विनोदः—अथ किम् ? माम् अपि सहैव नेष्यति पिता । यतः विद्यालये इदानीं ग्रीष्मावकाशः सञ्जातः ।

नरेशः—शोभनम् । अवश्यं गच्छ । रोचिष्यते तुभ्यं तत्रत्यं मनोहरं दृश्यम् ।

विनोदः—मन्ये, त्वया दृष्टं तत् स्थानम् । कृपया निवेदय किञ्चिद् विस्तरेण ।

नरेशः—शृणु । जानासि एव अशोकस्य कलिङ्गविजयम् । प्राचीनः स एव कलिङ्गदेशः इदानीम् 'उड़ीसा' नाम्ना प्रसिद्धः । अस्य प्रदेशस्य अलङ्कारस्वरूप पुरीनगरम् । तत्र अस्ति भगवतः श्री जगन्नाथस्य विशालं मन्दिरम् । यत्र भक्ताः धार्मिकाश्च जनाः गत्वा भगवतो जगन्नाथस्य, तस्य भ्रातुः बलभद्रस्य, भगिन्याः सुभद्रायाश्च दर्शनं कृत्वा महान्तं मोदम् अनुभवन्ति पुण्यञ्च लभन्ते ।



श्री जगन्नाथ मन्दिरम्

विनोदः—अथ वर्षस्य कस्मिन् मासे पुर्यां महोत्सवः सञ्जायते ?

नरेशः—प्रतिवर्षम् आषाढमासे शुक्लपक्षस्य द्वितीयायां तत्र महान् जन-सम्मर्दः सञ्जायते। अस्मिन् अवसरे भारतवर्षस्य प्रत्येकस्मात् स्थानात् नराः नार्यश्च तत्र समवेता भवन्ति। अद्यैव भगवत्या सुभद्रया सहितस्य भगवतः जगन्नाथस्य बलभद्रस्य च प्रतिमा मन्दिराद् बहिः समानीय रथे स्थापिताः भवन्ति। एतदर्थं त्रयः, सुविशालाः

रथाः बहुमूल्यैः तोरणैः ध्वजैः अलङ्कारैः सुष्ठैश्च सुसज्जिताः भवन्ति। एषु रथेषु स्थूलाः रज्जूः बद्ध्वा भक्ताः रथान् स्वयं कर्षन्ति जनकपुरे वर्तमानं सुवर्णमन्दिरम् यावत् नयन्ति च। महत् तेषां सौभाग्यं मन्यन्ते जनाः ये तदानीं रथयात्रायां रज्जूनां स्पर्शे अपि समर्थाः भवन्ति।

विनोदः—किं सन्ति अन्यानि अपि मन्दिराणि अस्मिन् प्रदेशे दर्शनीयानि।

नरेशः—सन्ति एव। पुर्याः उत्तर-पूर्वस्यां दिशि दशसु क्रोशेषु कोणार्कमन्दिरं, मार्त्तण्डमन्दिरं, जगन्मोहनमन्दिरञ्च महत्त्वपूर्णं दर्शनीयं स्थानम्। एषु सर्वेषु मन्दिरेषु उत्कीर्णाः कलापरिपूर्णाः कृतयः अतीव रम्याः सन्ति। अस्मिन् एव प्रदेशे भुवनेश्वरस्य प्रसिद्धं मन्दिरं खण्डगिरेः त्रिषष्टिः गुहाश्च दर्शनीयाः सन्ति। लिङ्गराजस्य सुविशालं मन्दिरं तथा अन्यानि मुक्तेश्वरस्य, परशुरामस्य च मन्दिराणि दर्शनीयानि सन्ति।

विनोदः—मन्ये भारते सर्वत्रैव ऐतिहासिकानि दर्शनीयानि बहूनि मन्दिराणि विद्यन्ते येषां दर्शनेन पुण्येन सह ज्ञानस्य अपि अर्जनं कर्तुं शक्यते अनायासेन।

अस्तु, गच्छामि इदानीम्। पितृ-चरणाः प्रतीक्षमाणाः भविष्यन्ति। यावायाः प्रत्यागत्य अहं तुभ्यं सर्वं निवेदयिष्यामि। गच्छामि, प्रणामाः।

अभ्यास

इस पाठ को तीन बार पढ़ लेने के पश्चात् अपने मित्र को एक छोटा-सा पत्र लिखो, जिसमें पुरी की 'रथ-यात्रा' का वर्णन करो।

नीतिवाक्यामृतम्

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥१॥

प्रारभ्यते न खलु विघ्न-भयेन नीचैः
प्रारभ्य विघ्न-विहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमजना न परित्यजन्ति ॥२॥

यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ति ॥३॥

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्ध-परार्ध भिन्ना
छायेव मैत्री खलसज्जनानाम् ॥४॥

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणापराणां
परोपकारैर्न तु चन्दनेन ॥५॥

—भर्तृहरिः

अभ्यास

(१) उत्तर दो—

१. सत्सङ्गतिः बुद्धेः जाड्यं कथं हरति ?
२. सत्सङ्गत्या के लाभाः भवन्ति ?
३. अधमाः पुरुषाः कार्यं कथं न आरभन्ते ?
४. मध्यमाः कार्याणि आरभ्य मध्ये एव कथं विरमन्ति ?
५. कः कुलीनः कश्च गुणज्ञः कश्च दर्शनीयः ?
६. खलानां मित्रता कीदृशी भवति ?
७. कर्णौ कथं शोभेते ?
८. करयोः शोभा कथं भवति ?
९. दयालूनां कायः केन शोभते ?

(२) इच्छानुसार किसी एक श्लोक का 'अन्वय' लिखो ।

प्रथमा	रामः	रामौ	रामाः
द्वितीया	रामम्	,,	रामान्
तृतीया	रामेण	रामाभ्याम्	रामैः
चतुर्थी	रामाय	,,	रामेभ्यः
पंचमी	रामात्	,,	,,
षष्ठी	रामस्य	रामयोः	रामाणाम्
सप्तमी	रामे	रामयोः	रामेषु
सम्बोधन	हे राम		



भ्रष्टाचार निवारणम्

१. एकदा कश्चित् कविः कस्यचित् राज्ञः भवनम् अगच्छत्। तत्र प्रविशन् सः द्वारपालेन निवारितः। द्वारपालः अवदत्—सुकवे! अद्य राज्ञः प्राप्तस्य पुरस्कारस्य अर्धं मह्यम् आश्रृणोपि चेत् तुभ्यम् प्रवेशस्य अनुमतिं ददामि नान्यथा। विवशः कविः द्वारपालाय तद् आश्रुत्य राजभवनस्य प्रथमां कक्षां प्राविशत्। अनन्तरं द्वितीयां कक्षां यावद् प्रविशति तावत् द्वितीयः अपि द्वारपालः तं तथैव न्यवारयत्। कविः तस्मै अपि तथा प्रतिश्रुत्य राज्ञः साक्षात्कारम् अकरोत्।

कवेः कवितां श्रुत्वा प्रसन्नः नृपः कवये प्रचुरं द्रव्यं दातुम् आज्ञापयत्। किन्तु कविः अञ्जलिं बध्वा राजानम् अवदत्—राजन्! नाहं द्रव्यम् इच्छामि। यदि त्वं प्रसन्नोऽसि तर्हि कशाभिः मम पृष्ठे शतं प्रहाराः कारयितव्याः। विस्मितः राजा एवंविधं पारितोषिकं दातुं न ऐच्छत्। किन्तु कविना बहुवारं प्रार्थितः सः कवेः पृष्ठे कशया प्रहाराय भृत्यम् आज्ञापयत्। भृत्यः यदा प्रहाराय उद्यतः अभवत् तदा कविः भृत्यम् अवदत्—भो भृत्य, क्षणं तिष्ठ यावद् अहम् अर्धस्य पुरस्कारस्य भागिनौ द्वारपालौ अपि आनयामि। अनन्तरं राज्ञा पृष्टः कविः यदा सर्वं वृत्तान्तम् अकथयत् तदा द्वारपालौ निष्कासितौ, कविश्च प्रभूतेन धनेन पुरस्कृतः अभवत्।

अभ्यास

आश्रयोपि, आश्रुत्य, कशाम्, कशाभिः।

अनुवाद करो—

१. राजा ब्राह्मण को गौदान देने की प्रतिज्ञा करता है।

२. द्वारपाल ने कवि को रोक कर कहा—"मुझे आधा पुरस्कार देना होगा"।

३. घुड़सवार घोड़े को चाबुक से मारता है।

४. राजा ने नौकर को कोड़े लगाने की आज्ञा दी।

५. सुदामा तीन ड्योढ़ी पार कर कृष्ण के पास पहुँचे।

६. किसी को कुछ देने को कह कर फिर न देना अच्छा नहीं है।



दीपमालिका भारतवर्षस्य सुमहत् पर्वदिनम् अस्ति। एवम् अनुश्रूयते यत् रावणं हत्वा श्रीरामचन्द्रः कार्तिकमासस्य कृष्णे पक्षे अमावस्यायाम् अयोध्यां प्रत्यागच्छत्। सीतया लक्ष्मणेन च सहितं प्रियं रामचन्द्रं चतुर्दश-वर्षानन्तरं प्राप्य मुदिताः अयोध्यावासिनः स्वानि गृहाणि स्वच्छीकृत्य दीपानां मालया अलमकुर्वन्। ततः प्रभृति एव दीपावल्या उत्सवः प्राचलत् देवैः समुद्रस्य मन्थनात् भगवत्याः महालक्ष्म्याः प्रादुर्भावः अपि अस्मिन् एव दिवसे अभवत् इति हेतोः महालक्ष्म्याः पूजनम् अस्य दिनस्य प्रधानं कर्म।

अयम् उत्सवः कार्तिकमासस्य कृष्ण-त्रयोदशीतः शुक्ल-पक्षस्य द्वितीयां यावत् प्रचलति। इयं त्रयोदशी धन्वन्तरित्रयोदशीनाम्ना प्रख्याता अस्ति। अद्य वैद्याः आयुर्वेद-शास्त्रस्य प्रवर्त्तकं भगवन्तं धन्वन्तरिं पूजयन्ति। प्रायः सर्वे अपि हिन्दवः नवीनानि धातु-पात्राणि अद्य क्रीणन्ति। पुनः नरक-चतुर्दश्यां हनुमतः जन्म-महोत्सवः यमराजस्य पूजा च भवति। जनाः सूर्योदयात् प्रागेव स्नात्वा हनुमतः दर्शनाय मन्दिराणि गच्छन्ति। अनन्तरम् अमायां रात्रौ इन्द्रवरुणकुबेरादिभिः सह गणपतेः महालक्ष्म्याः च पूजनं गेहे गेहे भवति। जनैः प्रज्वलिताः सहस्रशः दीपाः सर्वत्र गृहेषु मालाकाराः शोभन्ते येन दीपमालिका इति नाम सार्थकं भवति। अद्य लक्ष्म्याः कामनया बहवः जनाः रात्रौ जागरणम् अपि कुर्वन्ति। अथ अपरस्मिन् दिवसे प्रतिपदि भक्ताः हिन्दवः षट्पञ्चाशत्प्रकाराणि भोज्यानि निर्माय गोवर्धनरूपाय भगवते

कृष्णाय समर्पयन्ति। द्वितीयायां भगिन्यः स्वान्-स्वान् भ्रातॄन् आमन्त्र्य भोजयन्ति।

यद्यपि सन्ति अनेकानि पर्वाणि तथापि दीपावल्यां यादृशः महोत्साहः जनानां हृदयेषु जायते तादृशः न अन्येषु पर्वसु। सन्ति च अत्र कारणानि तथा हि इदानीं शरदः शोभनः कालः भवति। नद्यः प्रसन्नजलाः, मार्गाः कर्दमरहिताः दिशः च मेघैर्मुक्ताः निर्मलाः भवन्ति, कृषकाः च नवीनया शस्यसम्पत्त्या मुदिताः भवन्ति।

अस्मिन् महोत्सवे महालक्ष्म्याः स्वागताय साधारणाः सम्पन्नाः च भारतीयाः यथाशक्ति लेपनादिना स्वानि-स्वानि गृहाणि स्वच्छानि सुसज्जितानि च कुर्वन्ति। नानाविधैः क्रीडनकैः, मृत्तिकापिण्डैः कांस्य-पित्तलादि-धातुपात्रैः मिष्टान्नैः लाजैः च हट्टाः पूरिताः भवन्ति येन नगराणां कापि अपूर्वा एव शोभा भवति।

मुदिताः बालाः विविधानि मृण्मयानि क्रीडनकानि पात्राणि च प्राप्य मिष्टान्नानि भुक्त्वा रात्रौ अमायाः घोरेऽपि अन्धकारे दीपानां मालया दिनमिव प्रकाशं सम्पाद्य हर्षातिरेकेण उच्छलन्ति। नूनम् एष महिमा महालक्ष्म्याः यत् पर्वणि अस्मिन् गेहे गेहे जने जने च महानुल्लासो विलसति।

अभ्यास

अनुश्रूयते, अलमकुर्वन्, प्राचलत्,
षट्पञ्चाशत्, कर्दमरहिताः, उच्छलन्ति।

संस्कृत में अनुवाद करो—

शरद् ऋतु आने पर रास्ते साफ और कीचड़हीन हो जाते हैं। मैंने अपना घर सजा लिया है। मोहन प्रसन्नता से उछलता है। मेरे पास ५१ पुस्तकें हैं, राम के पास ५६। ऐसा सुना जाता है कि राम के राज्य में कोई दुखी नहीं था, किसी के पुत्र नहीं मरते थे, कोई स्त्री विधवा नहीं होती थी। दीपावली के दिन बहुत से लोग नया कपड़ा भी खरीदते हैं।

तृतीय अनुच्छेद का हिन्दी अनुवाद लिखो।

पम्पावर्णनम्

सौमित्रे शोभते पम्पा प्रसन्ना निर्मलोदका ।
फुल्लपद्मैः पद्मवती शोभिता विविधैर्द्रुमैः ॥१॥

सौमित्रे पश्य पम्पायाः काननं शुभदर्शनम् ।
पादपाः यत्र राजन्ति शैलाः सशिखरा इव ॥२॥

पश्य लक्ष्मण रूपाणि वनानां पुष्पशालिनाम् ।
वर्षतां पुष्पवर्षाणि वर्षे तोयमुचामिव ॥३॥

प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः ।
वायुवेगैः प्रचलिताः पुष्पैरवकिरन्ति गाम् ॥४॥

पतितैः पतमानैश्च पादपस्थैश्च मारुतः ।
कुसुमैः पश्य सौमित्रे क्रीडतीव समन्ततः ॥५॥

विक्षिपन् विविधाः शाखाः नगानां कुसुमान्विताः ।
मारुतश्चलितः स्थानैः षट्पदैरनुगीयते ॥६॥

पुष्पितान् किल पश्यैतान् कर्णिकारान् समन्ततः ।
सुवर्णेनेव संपन्नान् नरान् पीताम्बरानिव ॥७॥

पश्य लक्ष्मण संनादं वने मोदविवर्धनम् ।
पर्वताग्रेषु वृक्षेषु विहगानां च कूजताम् ॥८॥

अमी लक्ष्मण दृश्यन्ते ह्याम्रा. कुसुमशालिनः ।
साङ्गरागा इव नराः क्रीडया चलमानसाः ॥९॥

सौमित्रे, पश्य, पम्पायाः चित्रासु वनराजिषु ।
किन्नरा नरशार्दूल विचरन्ति समन्ततः ॥१०॥

इमानि शुभगन्धीनि पश्य लक्ष्मण सर्वतः ।
कमलानि प्रकाशन्ते जले तरुण-सूर्यवत् ॥११॥

जले तरुण-सूर्याभैः भ्रमराहतकेसरैः ।
पङ्कजैः शोभते पम्पा समन्ताद् अभिसंवृता ॥१२॥

अभ्यास

अभ्यासार्थ निर्देश

भारत के आदिकवि वाल्मीकि की यह रचना है। सरल शब्दों में इतना सुन्दर, सरस और सजीव वर्णन अन्यत्र नहीं मिल सकता। लम्बी-चौड़ी झील, निर्मल जल, जल में खिले हुए अतुल कमल, किनारे विविध वृक्षों का मनोहर कुसुमित कानन, उसमें अठखेलियाँ करता हुआ पवन, जिससे बहुत से फूल झर कर पृथ्वी को ढक चुके हैं, कुछ अभी झर रहे हैं और कुछ डालियों में झूम रहे हैं, टहनियाँ हिल रही हैं, भौंरे उड़ रहे हैं इत्यादि। इस कविता को कई बार पढ़ो और आनन्द का अनुभव करो।

दरिद्रः सुदामा

सुदामा नाम कश्चित् दरिद्रः ब्राह्मणः कृष्णस्य सखा आसीत्। क्षुधा क्षामा तस्य भार्या नित्यम् एव मलिनानि वस्त्राणि अधारयत्। बालाश्च बहुधा सार्धं प्रातः वा भोजनाभावे महान्तं क्लेशम् अन्वभवन्। जीर्णं शीर्णम् उत्तरीयं मलिनं दीर्णञ्च धौतं धारयन् सुदामा अपि भिक्षायै इतस्ततः आदिवसम् अभ्रमत्। पतिव्रता तस्य भार्या एकदा पतिम् एवं प्राह—ब्रह्मन्! साक्षात् श्रियः पतिः श्रीकृष्णः तव सखा अस्ति। सः अधुना द्वारावत्यां राज्यं करोति। तत् कथं न भवान् तत्र गच्छति? सः दुःखिताय कुटुम्बिने तुभ्यं प्रचुरं द्रव्यं दास्यति येन आवाम् इमे बालाः च सुखिनः भविष्यामः।

एवं भार्यया बहुशः प्रार्थितः सः विप्रः 'तत्र गमनेन अयं परमः लाभः यत् मम मित्रस्य भगवतः श्रीकृष्णस्य दर्शनं भविष्यति' इति सञ्चिन्त्य गमनाय मतिम् अकरोत्। भार्यां च आह—'हे कल्याणि, गृहे किञ्चिद् उपायनम् अस्ति चेद् देहि।' सा ब्राह्मणी पार्श्ववर्त्तिनः विप्रान् याचित्वा चतुरः मुष्टीन् पृथुक-तण्डुलान् आनीय चैलखण्डे बद्ध्वा भर्त्रे प्रादात्। महाराजस्य श्रीकृष्णस्य दर्शनं मह्यं कथं स्याद् इति चिन्तयन् विप्रः द्वारकाम् आगच्छत्।

तत्र द्वारपालैः प्रवेशितः विप्रः तिस्रः कक्षाः अतीत्य चतुर्थ्यां कक्षायां स्वर्णजटिते पर्यङ्के प्रियया रुक्मिण्या सहितं विराजमानं श्रीकृष्णम् अपश्यत्।

श्रीकृष्ण च वहोः कालाद् अनन्तरं स्वकीयं मित्रम् आगतं दृष्ट्वा पर्यङ्कात् उत्थाय महता आनन्देन तं बाहुभ्याम् आलिङ्गत्। सख्युः आलिङ्गनेन प्रीतस्य श्रीकृष्णस्य नेत्राभ्याम् आनन्दाश्रूणां बिन्दवः न्यपतन्।

अथ तं पर्यङ्के उपवेश्य श्रीकृष्णः स्वयम् एव तस्य पादौ प्राक्षालयत् कुङ्कुमेन कर्पूरेण च मिश्रितेन दिव्यगन्धेन चन्दनेन व्यलिम्पत् च। श्रीकृष्णस्य भार्या रुक्मिणी अपि चामरस्य व्यजनेन विप्रं पर्यचरत्। सर्वम् एतद् दृष्ट्वा सर्वः अपि अन्तःपुरजनः विस्मितः अभवत्। पूजायाः अनन्तरं श्रीकृष्णः सुदामा च परस्परं करौ गृहीत्वा गुरुकुले घटिताः पूर्वाः गाथाः अकथयताम्।

श्रीकृष्णः प्राह, हे सखे! गुरुकुलात् आगत्य त्वया विवाहः कृतः न वा? किं त्वम् इदानीम् अपि गुरोः कुले आवयोः वासं स्मरसि? यथा च एकदा गुरुपत्न्या प्रेषितौ आवाम् इन्धनानाम् आनयनाय महद्वनम् अगच्छताम्। तत्र च वातेन सह महती वृष्टिः अभवत् सूर्यश्च अस्तम् अगच्छत्, तथा सर्वं वनं जलमयम् अभवत्, एवं घोरे अन्धकारे दिशः अविदित्वा आवां परस्परं हस्तौ गृहीत्वा अभ्रमताम्। अथ उदिते रवौ अस्माकं गुरुः सान्दीपनिः आवाम् अन्वेषमाणः तत्र आगत्य आवाम् अपश्यत्। आवयोः सेवाभावेन सन्तुष्टो गुरुः "युवयोः मनोरथाः पूर्णाः सन्तु अधीता विद्या च सफला भवेत्" इत्यादि बहून् आशीर्वादान् अददात्।

द्विजेन सह एवं सङ्कथयन् हरिः सहासं तम् उवाच—'हे ब्रह्मन्, त्वया गृहात् किम् उपायनम् आनीतम्? देहि मह्यम्।' लज्जितः सुदामा लक्ष्म्याः पत्ये तान् तण्डुलान् दातुं न ऐच्छत् अथ श्रीकृष्णः स्वयम् एव तत् आहृत्य प्रेम्णा अखादत्।

सुदामा एकां रजनीं यावत् स्व-मित्रस्य गृहे उषित्वा तत्र भुक्त्वा पीत्वा च आत्मानं स्वर्गं गतम् इव मत्वा प्रातः स्वगृहम् अगच्छत्। निःस्पृहः सुदामा श्रीकृष्णं किमपि द्रव्यं न याचितवान्। किन्तु यदा सः स्वगृहं प्राप्तवान् तदा स्वकुट्याः स्थाने महान्तं प्रासादं दृष्ट्वा अत्यन्तं विस्मितः अभवत्। अनन्तरं सुसज्जितैः बालैः हर्षेण उत्फुल्लया पत्न्या च गृहे प्रवेशितः सुदामा

अभ्यन्तरं प्रचुरं धनं धान्यं च दृष्ट्वा सर्वं स्वमित्रस्य श्रीकृष्णस्य प्रसादं मत्वा श्रीकृष्णं स्मरन् सुखेन सर्वं जीवनम् अयापयत् ।

अभ्यास

क्षामा, शीर्णम् उत्तरीयम्, दीर्णम्, धौतम्, उपायनम्, पृथुकतण्डुलान् (चिउड़े), याचित्वा, चैलखण्डेन, पर्यङ्के, व्यजनेन, पर्यचरत्, वात्यया, अन्वेषमाणः ।

१. भर्तृ शब्द का रूप किस शब्द के समान होगा ?

२. इस पाठ में आये हुए 'सखि' शब्द के रूपों की विभक्ति आदि का निर्देश करो ।

संस्कृत में अनुवाद करो--

(१) यह भिखारिन भूख से दुबली है ।
(२) पुराना, मैला और फटा वस्त्र पहिन कर सभा में नहीं जाना चाहिये ।
(३) मेरी धोती फट गई है, दूसरी खरीदूँगा ।
(४) सुदामा ने कृष्ण को क्या भेंट दी ?
(५) आज भोजन नहीं बनाऊँगा, दही के साथ चिउड़ा खाऊँगा ।
(६) बाढ़ पीड़ितों के निमित्त पैसा माँग कर भेजूँगा ।
(७) यशोदा वन जाते समय कृष्ण को कपड़े में बाँधकर रोटियाँ देती थीं ।



भारतीये इतिहासे मौर्याणां राज्यकालः प्रसिद्धः। वीरवरस्य चन्द्रगुप्तस्य पौत्रः तथा बिन्दुसारस्य पुत्रः अशोकः मौर्यवंशस्य महान् शासकः अभवत्। सः यदा राज्यम् अध्यतिष्ठत् तदा कलिङ्गनामकं राज्यं तस्य शासनाद् बहिः आसीत्। अशोकः तस्य विजयाय निश्चयम् अकरोत्। सः स्वयम् अपि शूरः योद्धा आसीत्। तस्य सेनायां च कुशलाः योद्धारः शिक्षिताः गजाः अश्वाः च आसन्। सः महत्या सेनया सह कलिङ्गदेशस्य विजयाय प्रस्थानम् अकरोत्। कलिङ्गेषु तदा भयानकः संग्रामः अभवत्। यस्मिन् कलिङ्गानां राजा पराजितः अभूत्।

अस्मिन् युद्धे लक्षं सैनिकाः मृताः सार्द्ध-लक्षं च आहताः अभवन्। केषांचिद् बाहवः छिन्नाः केषांचित् च पादाः। केचन एकेन बाहुना केचन एकेन पादेन केचन एकेन अक्ष्णा च हीनाः सञ्जाताः। अशोकः नेत्राभ्यां बाहुभ्यां पादाभ्याञ्च हीनान् नरान् तथा पतिभ्यः विलपन्तीः स्त्रीः, पुत्रेभ्यः च रुदतीः जननीः दृष्ट्वा अत्यन्तं दुखितः अभवत्। सः अचिन्तयत्— भयङ्करः मानवस्य स्वार्थः। स्वार्थाय अहं भीषणं युद्धम् अकरवम्। येन व्यर्थम् एव असंख्याः नराः मृताः असंख्याश्च बालाः अनाथाः सञ्जाताः। सः युद्धात् विरम्य धर्माय उद्यतः अभवत्। भगवतः बुद्धस्य उपदेशान् सम्यक् ज्ञात्वा सः अहिंसायाः प्रचारम् अकरोत्। तेन तस्य राज्ये पशूनां वधः निषिद्धः।

सः प्रजाः पितृवद् अपालयत्। विदेशेषु दूरेषु च देशेषु धर्मस्य अहिंसायाश्च प्रचाराय दूतान् प्रैषयत्। पथिकानां सुखाय स्थाने-स्थाने कूपानां जलाशयानां धर्मशालाना च निर्माणम् अकारयत्।

जीवेषु दयां कुरु। दीनेभ्यः दानं देहि। सत्यं वद। नम्रः भव। बहुधनाय स्पृहां मा कुरु। मातुः पितुः मित्राणां परिचितानाञ्च सेवां कुरु। इमे अन्ये च तस्य उपदेशाः शिलासु लिखिताः अद्यापि दृश्यन्ते।

सत्यमेव जयति—इति तस्य सुनिश्चितं मतम् आसीत्।

अभ्यास

१. निम्नांकित में विभिन्न कारक प्रयोग के कारण बताओ—

राज्यम् अध्यतिष्ठत्। महत्या सेनया, बाहुना, पादेन, अक्ष्णा, (विलपन्तीः), युद्धात् विरम्य धर्माय उद्यतः अभवत्, बहुधनाय।

२. अशोक के सम्बन्ध में १० स्वरचित सरल संस्कृत वाक्य लिखो।

शब्दमात्रान्न भेतव्यम्

अस्ति श्रीपर्वतमध्ये ब्रह्मपुरं नाम नगरम्। तस्य शिखरप्रदेशे घण्टाकर्ण-नामा राक्षसः प्रतिवसतीति जनप्रवादः श्रूयते। एकदा घण्टां चोरयित्वा पलायमानः कश्चिच्चौरः व्याघ्रेण व्यापादितः। ततः तत्पाणिभ्यां पतिता घण्टा वानरैः प्राप्ता। वानराः तां घण्टाम् अनुक्षणं वादयन्ति। अथ तन्नगरनिवासिनः मनुष्यं खादितं दृष्ट्वापि प्रतिक्षणं घण्टारवं श्रुत्वा चिन्तयन्ति—"कुपितः घण्टाकर्णः मनुष्यान् खादति घण्टां च वादयति" इति। एवं विचिन्त्य सर्वे जनाः नगरात् पलायिताः नगरस्य राजा च महान् चिन्तितः अभवत्।

अथ तन्नगरनिवासिनी एका बुद्धिमती रमणी 'वानराः घण्टां वादयन्ति' इति स्वबुद्धिबलेन विज्ञाय राज्ञः समीपं गत्वा अवदत् "देव, यदि धनव्ययः क्रियते तदा अहम् एनं घण्टाकर्णं साधयामि।" ततः राज्ञा तस्यै धनं दत्तम्। रमण्या च तं गणेशस्य पूजायाः गौरवं दर्शयित्वा स्वयं वानरप्रियफलानि आदाय वनं प्रविश्य फलान्याकीर्णानि। ततो घण्टां परित्यज्य वानराः फलासक्ताः अभवन्। रमणी च घण्टां गृहीत्वा नगरमागता सर्वैः जनैः पूज्या अभवत्।

शब्दमात्रान्न भेतव्यमज्ञात्वा शब्दकारणम्।
शब्दहेतुं परिज्ञाय रमणी गौरवं गता॥

पलायमानः, आदाय, परित्यज्य, व्यापादितः, आकीर्णानि, जनप्रवादः

१. अनुवाद करो।

उत्तर प्रदेश में लखनऊ नाम का एक बड़ा नगर है। वहाँ विधान सभा का सुन्दर भवन है। वहाँ की जन्तुशाला बहुत अच्छी है। वहाँ और भी अनेक दर्शनीय स्थान हैं। उस नगर के रहने वाले सभ्य कहे जाते हैं।

२. इस पाठ में आये हुए पूर्वकालिक क्रिया बताने वाले शब्दों को चुनकर संस्कृत वाक्यों में प्रयुक्त करो।

अनुगङ्गं विराजमानां वाराणसी भारतवर्षस्य सर्वप्राचीना नगरी अस्ति। अत्र भागीरथ्याः तटे राजभिः महाराजैश्च निर्मिताः घट्टाः काञ्चित् अपूर्वाम् एव शोभां जनयन्ति। नद्याः तटे घट्टानाम् ईदृशी सुविस्तीर्णा मनोहरा च परम्परा संसारे अन्यत्र कुत्रापि सुलभा नास्ति। एभिः घट्टैः सुशोभिता अर्धचन्द्राकारा काशी सर्वेषाम् आगन्तुकानां मनांसि मोहयति। एषु घट्टेषु मणिकर्णिका-दशाश्वमेधौ बहु प्रसिद्धौ स्तः। दशाश्वमेध-घट्टे प्रत्यहं सन्ध्यायां कीर्त्तनं कथादिकञ्च भवति। रात्रौ विद्युद्दीपैः आलोकिताः इमे घट्टाः पृथिव्याम् अवतीर्णस्य तारकितस्य नभसः भ्रमम् उत्पादयन्ति।

अत्र वर्त्तमानेषु बहुषु मन्दिरेषु विश्वनाथस्य अन्नपूर्णायाः च मन्दिरम् अतीव प्रसिद्धम्। बहुमूल्यैः सुवर्णपत्रैः मंडिते विश्वनाथ-मन्दिरे प्रतिष्ठापिता विश्वेश्वरस्य मूर्त्तिः, भक्तैः भक्त्या समर्पितैः पूजोपहारैः च सर्वदा आच्छादिता तिष्ठति। दूरदूरतरात् स्थानात् यात्रिणः प्रतिदिनम् अस्याः शिवमूर्त्तेः दर्शनाय आगच्छन्ति।

विद्यागुरोः विश्वनाथस्य इयं नगरी बहोः प्राचीनकालात् ज्ञानाय मुक्तये च प्रसिद्धा अस्ति। अस्माकं देशस्य अनेके ऐतिहासिकाः महापुरुषाः अत्रागत्य ज्ञानार्जनम् शान्तिलाभञ्च अकुर्वन्। अष्टादशानां पुराणानां रचयिता व्यासः, बृहत्तरे भारते अहिंसायाः प्रचारकः भगवान् बुद्धः, जगद्गुरुः श्रीशङ्कराचार्यः, परमवैष्णवः श्रीरामानन्दः, रामभक्तः श्रीतुलसीदासः, साम्य-

भावप्रचारकः कबीरदासः, अन्ये च बहवः सम्प्रदाय-प्रवर्त्तकाः आचार्या अत्रागत्य वासम् अकुर्वन्। हिन्दी-भाषायाः सुप्रसिद्धः साहित्यिकः भारतेन्दुः श्रीहरिश्चन्द्रः अत्रैव जन्म अलभत।

देशपूज्यैः नेतृभिः मदनमोहनमालवीयैः स्थापिताः हिन्दू-विश्वविद्यालयः, सारनाथः, भारत-मातृमन्दिरम्, रामनगरदुर्गम्, मानमन्दिरम्, सरस्वतीभवनम्, संस्कृत-विश्वविद्यालयः, नागरी-प्रचारिणी सभा, इमानि अन्यानि च अनेकानि अत्रत्यानि दर्शनीयानि स्थानानि सन्ति।

अस्य नगरस्य पित्तल-पात्राणि, काष्ठक्रीडनकानि, कौशेयवस्त्राणि च प्रसिद्धानि सन्ति। अत्र प्रायः गेहे गेहे जने जने च संस्कृत-भाषायाः प्रचारः अस्ति।

अभ्यास

अपने मित्र को संस्कृत में पत्र लिखो और इस पाठ के आधार पर काशी का परिचय दो।



गाः पालयन्तौ च पुनः सहितौ रामकेशवौ ।
भ्रममाणौ वने तत्र रम्यं तालवनं गतौ ॥१॥

तच्च तालवनं नित्यं धेनुको नाम दानवः ।
नृ-गो-मांस-कृताहारः सदाऽध्यास्ते खराकृतिः ॥२॥

तत्र तालवनं रम्यं फलसम्पत्-समन्वितम् ।
दृष्ट्वा स्पृहान्विता गोपाः फलदानेऽब्रुवन् वचः ॥३॥

हे राम हे कृष्ण सदा धेनुकेनैव रक्ष्यते ।
भूप्रदेशो यतस्तस्मात् त्यक्तानीमानि सन्ति वै ॥४॥

फलानि पश्य तालानां गन्धमोदयुतानि वै ।
वयमेतान्यभीप्सामः पात्यन्तां यदि रोचते ॥५॥

इति गोपकुमाराणां श्रुत्वा सङ्कर्षणो वचः ।
कृष्णश्च पातयामास भुवि तालफलानि वै ॥६॥

तालानां पततां शब्दम् आकर्ण्यासुरराट् ततः ।
आजगाम स दुष्टात्मा कोपाद् दैतेयगर्दभः ॥७॥

पद्भ्याम् उभाभ्यां स तदा पश्चिमाभ्यां च तं बली ।
जघानोरसि ताभ्यां च स च तेनाप्यगृह्यत ॥८॥

गृहीत्वा भ्रामणेनैवं चाम्बरे गतजीवितम् ।
तस्मिन्नेव प्रचिक्षेप वेगेन तृणराजिषु ॥९॥

ततः फलान्यनेकानि तालाग्रात् निपतन् खरः ।
पृथिव्यां पातयामास महावातोऽम्बुदानिव ॥१०॥

अन्यान्यप्यस्य वै ज्ञातीन् आगतान् दैत्यगर्दभान् ।
कृष्णाश्चिक्षेप तालाग्रे बलभद्रश्च लीलया ॥११॥

ततो गावो निरावाधास्तस्मिंस्तालवने सदा ।
नवशष्पं सुखं चेरुर्यत्र भुक्तमभूत् पुरा ॥१२॥

अभ्यास

१. सन्धि-विच्छेद कर नियम बताओ ।

धेनुकेनेव, एतान्यभीप्सामः, जघानोरसि, अन्यान्यप्यस्य ।

२. सरल संस्कृत में अत्यन्त संक्षिप्त रूप से धेनुक-वध का वर्णन लिखो ।

अस्ति अयोध्यायां चूडामणिः नाम क्षत्रियः। धनार्थी सः महता क्लेशेन भगवन्त शङ्करं चिरकाल-पर्यन्तम् आराधयामास। आराधनया प्रसन्नः शिवः स्वप्ने दर्शनं दत्वा तम् अवदत्—

'यत् त्वम् अद्य प्रातः क्षौरं कृत्वा लगुडं हस्ते कृत्वा गृहे निभृतं स्थास्यसि ततः अस्मिन् एव अङ्गणे समागतं भिक्षुं द्रक्ष्यसि। तं निर्दयं लगुडप्रहारेण हनिष्यसि। ततः सः सुवर्णकलशः भविष्यति। तेन त्वं यावज्जीवं सुखी भविष्यसि।

ततः तथा कृते सति तत् सर्वं यथाकथितम् अभवत्। तत्र क्षौरकर्मकरणाय आगतः नापितः सर्वं वृत्तान्तम् अवलोक्य अचिन्तयत्—अये, निधिप्राप्तेः सरलः अयम् उपायः। तत् अहम् अपि एवं किं न करोमि ? ततः प्रभृति नापितः प्रतिदिनं लगुडं हस्ते गृहीत्वा सुनिभृतं भिक्षोः आगमनं प्रतीक्षते। एकदा तेन प्राप्तः भिक्षुः लगुडेन व्यापादितः। तस्मात् अपराधात् सः नापितः अपि राजपुरुषैः व्यापादितः।

पुण्यात् लब्धं यदेकेन तन्ममापि भविष्यति।
हत्वा भिक्षुं महालोभात् निध्यर्थी नापितो हतः॥

अभ्यास

आराधयामास, क्षौरम्, नापितः, निभृतम् (तूष्णीम्), यावज्जीवम्, प्रतीक्षते, व्यापादितः ।

अनुवाद करो—

१. जो छात्र लड़कपन में परिश्रम से पढ़ता है वह जीवन-पर्यन्त सुखी रहता है ।

२. नाई बाल बनाने का काम करता है ।

३. चोर अँधेरे में चुपचाप खड़ा रहा ।

४. माता पुत्र की प्रतीक्षा करती है ।

५. चिड़ियों ने गिद्ध को मार डाला ।

६. तुम कहाँ ठहरोगे ?

कृषकः कृषिकर्म करोति। सः हलेन क्षेत्राणि पुनः पुनः कर्षति, एवमनेकवारं कृष्टेषु क्षेत्रेषु सः बीजानि वपति, जलेन सिञ्चति च, येन अंकुराः उत्पद्यन्ते सस्यानि च जायन्ते। सस्येषु मञ्जर्यो भवन्ति, मञ्जरीषु च अन्नानि। कृषकः हर्षेण उत्फुल्लः भवति। सहसा करकापातः भवति। तस्य फलवती कृषिः विनष्टा भवति। कदाचित् च खले संगृहीतः अन्नराशिः वह्निना नश्यति। कदाचित् वृष्टेः अभावे कृषिः शुष्यति। किन्तु एवं दैवकृतेन व्याघातेन किं सः कृषिकर्म त्यजति ? कर्मक्षेत्रम् इदं जगत्। पौरुषम् अस्माकम् अधीनम्, फलं तु दैवाधीनम्। फलाशां परित्यज्य कर्माणि कर्त्तव्यानि। कौरवैः सह युद्धे विजयो भवति न वा भवति इत्येवं संशयालुम् अर्जुनं श्रीकृष्णः एतद् एव उपादिशत्—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥१॥
कर्मणं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥२॥

अभ्यास

करकापात—(ओले गिरना), खले, व्याघातेन,
उपादिशत—उप + विश् + लङ्।

संशयालुम् (कृपालुः, श्रद्धालुः, दयालुः)

अनामयं-पदम्—रागादिरहितम् अनामयम्।

मोक्षाख्यं पदं स्थानम्।

१. गीता के इन श्लोकों को कण्ठ करो और इस पाठ से कुछ शब्द चुनकर—'अहं कृषकः' शीर्षक देकर खेत और खेती का वर्णन संस्कृत में लिखो। कुछ नये शब्द अपने अध्यापक महोदय से पूछ लो।



जीवेम शरदः शतम्

युधिष्ठिर उवाच—

शतायुरुक्तः पुरुषः शतवीर्यश्च जायते ।
कस्मान्म्रियन्ते पुरुषा बाला अपि पितामह ॥१॥

भीष्म उवाच—

अत्र तेऽहं प्रवक्ष्यामि यन्मां त्वमनुपृच्छसि ।
अल्पायुर्येन भवति दीर्घायुर्वापि मानवः ॥२॥
आचाराल्लभते ह्यायुराचाराल्लभते श्रियम् ।
आचाराल्लभते कीर्तिं पुरुषः प्रेत्य चेह च ॥३॥
अक्रोधनः सत्यवादी भूतानामविहिंसकः ।
अनसूयुरजिह्मश्च शतं वर्षाणि जीवति ॥४॥
ब्राह्मे मुहूर्त्ते बुध्येत धर्मार्थावनुचिन्तयेत् ।
उत्थायाचम्य तिष्ठेत् पूर्वां सन्ध्यां कृताञ्जलिः ॥५॥
एवमेवापरां सन्ध्यां समुपासीत वाग्यतः ।
नेक्षेतादित्यमुद्यन्तं नास्तं यान्तं कदाचन ॥६॥
ऋषयो नित्यसन्ध्यत्वाद् दीर्घमायुरवाप्नुवन् ।
तस्मात्तिष्ठेत् सदा पूर्वां पश्चिमां चैव वाग्यतः ॥७॥
प्रसाधनञ्च केशानामञ्जनं दन्तधावनम् ।
पूर्वाह्णेषु एव कार्याणि देवतानाञ्च पूजनम् ॥८॥

नाज्ञातैः सह गच्छेत् नैको न चपलैः सह ।
उपानहो च वस्त्रं च धृतमन्यैर्न धारयेत् ॥९॥

पन्था देयो ब्राह्मणाय गोभ्यो राजभ्य एव च ।
वृद्धाय भारतप्ताय गर्भिण्यै दुर्बलाय च ॥१०॥

हीनाङ्गानतिरिक्ताङ्गान् विद्याहीनान् विगर्हितान् ।
रूपद्रविणहीनांश्च सत्त्वहीनांश्च नाक्षिपेत् ॥११॥

कृत्वा मूत्रपुरीषे तु रथ्यामाक्रम्य वा पुनः ।
पादप्रक्षालनं कुर्यात् स्वाध्याये भोजने तथा ॥१२॥

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि संप्रवर्धन्ते कीर्त्तिरायुर्यशो बलम् ॥१३॥

अभिवादयीत वृद्धांश्च दद्याच्चैवासनं स्वकम् ।
कृताञ्जलिरुपासीत गच्छन्तं पृष्ठतोऽन्वियात् ॥१४॥

यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे यत्तदाद्यं भूतिमिच्छता ॥१५॥

आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत् ।
आर्द्रपादस्तु भुञ्जानो शतं वर्षाणि जीवति ॥१६॥

अन्यदेव भवेद्वासः शयनीये नरोत्तम ।
अन्यद्रथ्यासु देवानामर्चायामन्यदेव हि ॥१७॥

वृद्धो ज्ञातिस्तथा मित्रं दरिद्रो यो भवेदपि ।
गृहे वासयितव्यास्ते धन्यमायुष्यमेव च ॥१८॥

अभ्यास

१. निम्नांकित शब्दों के अर्थ लिखो—
प्रेत्य, अनसूयुः, अजिह्मः, वाग्यतः, प्रसाधनम्, अतिरिक्ताङ्गान्, रथ्यासु, आक्रम्य, पुरीषम्, संविशेत्, अन्वियात्, निषण्णः ।

२, ३, ४, ९, १० तथा ११ वें श्लोक को कण्ठ करो ।

संस्कृत में अनुवाद करो।

१. जो क्रोध नहीं करता, सदा सच बोलता है और हृदय का कुटिल नहीं होता वह सौ वर्ष जीता है।

२. लँगड़े-लूले को देखकर हँसना नहीं चाहिये।

३. गाँव के पास ही मल और मूत्र का त्याग नहीं करना चाहिये।

४. राह चलकर आओ तो पैर अवश्य धो डालो।

५. भले आदमी बाजार के लिये और घर के लिये अलग-अलग कपड़े रखते हैं।

—०—



चौर चातुर्यम्

बभूव काञ्ची नाम राजधानी, तस्यां सुव्रतापो नाम राजा। तत्रैकदा कस्यापि धनिकस्य धनं चोरयन्तश्चत्वारश्चौराः प्रशास्तृपुरुषैः प्राप्ताः, शृंखलया बद्ध्वा राज्ञे निवेदिताः

राजा— रे रे घातकपुरुषाः ! चतुरोऽपि चौरानेतान् नगराद् बहिर्नीत्वा शूलमारोप्य मारयत। ततो राजाज्ञया घातकपुरुषैस्त्रयश्चौराः शूलमारोप्य हताः।

चतुर्थेनोक्तम्— रे रे घातकपुरुषाः ! त्रयश्चौरा युष्माभिर्हता एव। इदानीं राजाग्रे मद्वचनं श्रावयित्वा मां मारयत। यतोऽहमेकां महतीं विद्यां जानामि, मयि मृते साऽस्तं यास्यति। राजा तु तां गृहीत्वा मां मारयतु। येन विद्या मर्त्यलोके तिष्ठेत्।

घातकः— रे चौर पुरुषाधम ! वधस्थानमानीतोऽसि। किमतोऽपि जीवितुमिच्छसि ! कां विद्यां जानासि ! कथं वा तवाधमस्य विद्या भूपालेन ग्रहीतव्या ?

चौरः— रे घातकाः ! किं ब्रूय ! राजकार्यबाधां कर्तुमिच्छथ। यदि राजा ज्ञास्यति तदावश्यं तेन ग्रहीतव्या महतीयं विद्या। तत तस्य चौरस्य वचनैः घातकैः सा वार्ता राज्ञे निवेदिता। राजा च कौतुकमाकर्ण्य चौरमाहूय पप्रच्छ।

राजा—रे चौर, कां विद्यां जानासि ?

चौरः—देव ! सुवर्णकृषिं जानामि ।

राजा—का परिपाटी ?

चौरः—देव, सर्षपपरिमाणानि सुवर्णबीजानि कृत्वा भूमावुप्यन्ते । येन मासमात्रेण सर्षपसदृशा एव कन्दल्यो भवन्ति । देवः प्रत्यक्षं पश्यतु ।

राजा—चौर ! अपि सत्यमेतत् ?

चौरः—देवस्य पुरतः कस्यासत्यभाषणे शक्तिः । यदि मम वचनंव्यभिचरति तदा मासान्ते ममाऽप्यन्तो भविष्यति । तदापि देवः शास्तिकरणे च प्रभुरेव स्थास्यति ।

राजा—भद्रम्, वप सुवर्णम् ।

ततश्चौरः सुवर्ण दाहयित्वा सर्षपमात्राणि बीजानि कृत्वा राजान्तःपुरक्रीडासरस्तटे परमनिगूढस्थाने भूपरिष्कारं कृत्वा वभाषे ।

चौरः—देव ! क्षेत्रबीजे सम्पन्ने । वप्ता कश्चित् दीयताम् ।

राजा—त्वमेव किं न वपसि ?

चौरः—यदि सुवर्णवपने ममैवाधिकारो भवति, तदा किमहं दुःखी भवामि किन्तु सुवर्णवपने चौरस्याधिकारो नास्ति । येन कदापि किमपि न चोरितमस्ति, स सुवर्णबीजानि वपतु ! देव एव किं न वपति ?

राजा—मया चरणेभ्यो दातुं बाल्ये तातचरणानां धनं चोरितम् ।

चौरः—तर्हि मन्त्रिणो वपन्तु ।

मन्त्रिणः—वयं राजोपजीविनः कथमस्तेयिनो भवामः ?

चौरः—तर्हि धर्माधिकारी वपतु ।

धर्माध्यक्षः—मयाऽपि बाल्यदशायां मातुर्मोदकाश्चोरिताः ।

चौरः—यदि यूयं सर्वेऽपि चौराः कथमहमेव केवलं मारणीयोऽस्मि ।

तच्चौरवचनं श्रुत्वा सभासदः सर्वे जहसुः । राजाऽपि हास्यरसापनीतक्रोधो विहसितवान् ।

राजा—रे चौर, न मारणोयोऽसि। हे मन्त्रिणः! कुबुद्धिरपि बुद्धिमानयं चौरो हास्यरसप्रवीणः। ततो ममैव सन्निवाने तिष्ठतु, प्रस्तावे मां हासयतु मोदयतु च। ततः स चतुरश्चौरो राजा स्वसन्निधाने धृतः।

अभ्यास

प्रशास्तृपुरुषैः, कन्दलयः, मूपरिष्कारम्, वप्ता, चारणेभ्यः, प्रवीणः, सन्निधाने।

सन्धि-विच्छेद करो—

१. तत्रैकदा।

२. तच्चौरवचनम्।

हिन्दी में उत्तर दो—

१. चौरः कां विद्याम् अजानात्?

२. क्षेत्रबीजयोः सम्पन्नयोः चौरः किम् उवाच?

३. राजा चौर आसीत् न वा?

४. किं युष्माभिः कदापि चौर्यं कृतम्?

संस्कृत में अनुवाद करो—

१. यदि सच बोलोगे तो सुन्दर फल पाओगे।

२. यदि झूठ बोलते तो दण्ड पाते।

३. कल हम नाटक खेलने जायेंगे।

४. वे हमारे पास क्यों नहीं आते?

५. व्यायाम से शरीर पुष्ट होता है।

—०—



(१)

अशोकनगरम्

लक्ष्मणपुरम्

ईशवीया तिथिः १७-७-६२

पूज्याः पितरः

सादरं प्रणामाः

अत्र कान्यकुब्जविद्यालये सप्तम्यां कक्षायां मम प्रवेशो जातः। प्रवेश-दिवसे ज्येष्ठो मातुलः मया सह विद्यालयं गत्वा शुल्कन्यासम् अकरोत्। शिक्षकैः निर्दिष्टानि पाठ्य-पुस्तकानि लिपिपुस्तकानि च क्रीत्वा अहं सम्यक् पठितुं प्रवृत्तोऽस्मि। विद्यालये सर्वेऽपि शिक्षकाः सौम्याः सरलाः सुयोग्याश्च सन्ति। विद्यालयभवनमपि भव्यं विशालञ्च। यद्यपि इदानीं स्वल्पा एव दिवसाः व्यतीताः तथापि अनेके सहपाठिनः मम सखायः सञ्जाताः यैः सह प्रतिदिनं सायंकाले अहं क्रीडाभूमौ कन्दुकादिभिः क्रीडामि।

मम स्वास्थ्यम् अत्र शोभनम् अस्ति।

पूज्या मातामही, मातामहः मातुलाश्च सर्वे कुशलिनः सन्ति।

भवदीयः प्रियः पुत्रः

गोपालः

(२)

सुमेरपुरतः
श्रावणकृष्ण सप्तमी २०१४

आयुष्मान् गोपाल, स्वस्ति तेऽस्तु ।

लक्ष्मणपुरस्य आदर्शे विद्यालये सप्तम्यां कक्षायां तव प्रवेशो जातः इत्यनेन समाचारेण वयं सर्वे प्रसन्नाः स्मः । लक्ष्मणपुरनगरम् इदानीं बहुजनाकीर्णं जातम् । तत्र प्रतिक्षणं महता वेगेन बहूनि यानानि धावन्ति । विद्यालयं गच्छत् त्वम् अत्यन्तं सावधानतया गच्छेः, पाठशालायाञ्च गुरुभिः मित्रैश्च सह सदा विनयेन व्यवहारं कुर्याः । इतस्ततः भ्रमणे मनो न दैयम् । मातामहादीनां शुश्रूषा च समये कर्त्तव्या । पठने एवं श्रमः कर्त्तव्यः येन वार्षिक्यां परीक्षायां प्रथमो भूयाः ।

माता तुभ्यमाशीर्वादं ददाति अनुजाश्च त्वां प्रणमन्ति ।

त्वदीयः पिता
रामदेवः

अभ्यास

१. अध्यापक की सहायता से निम्नांकितों के अर्थ लिखो—
मातुलानी, भागिनेयः, भागिनेयी, स्वस्रीयः, स्वस्रीया, सहोदरः, विमातृकः, पितृव्यः, पितृव्यसा, पितृव्यस्रीयः, जामाता, श्वश्रूः, श्वसुरः, दुहिता, दौहित्रः, पौत्रः, प्रपौत्रः, नप्ती, पितामहः, पितामही ।

२. अपने मित्र को एक पत्र लिखो और उसमें जिस शहर में तुम पढ़ रहे हो उसका संक्षिप्त परिचय दो ।

———

आवेदन-पत्रम्

(१)

श्रीमन्तः प्रधानाध्यक्षमहोदयाः

राजकीयः उच्चतर-माध्यमिक-विद्यालयः, प्रयागः

महाशयाः,

प्रणतिपूर्वकं सादरं निवेदनमिदं यत् शनिवासरस्य सायङ्कालादेवाहं ज्वरेण पीडितोऽस्मि अत एवाद्य अहं विद्यालयमागन्तुं न प्रभवामि। प्रार्थये यत् कृपया त्रयाणां दिवसानामवकाशं मह्यं स्वीकुर्वन्तु भवन्तः।

ईशवीया तिथिः, १७-८-६२

भवतामाज्ञाकारी शिष्यः

रामनारायणमिश्रः

कक्षा सप्तमी

(२)

महानुभावाः,

मम भगिन्याः विवाहसंस्कारः आगामिन्याम् माघकृष्णसप्तम्याम् शुक्रवासरे रात्रौ सम्पत्स्यते। अस्मिन्नेव दिने सायं द्वारपूजामुहूर्त्तः अस्ति। अस्मिन्नवसरे सप्ताहस्यैकस्यावकाशः आवश्यकः। आशासे यत् श्रीमन्तः द्वितीयामारभ्य नवमीयं यादवकाशं मदीयं स्वीकृत्यानुग्रहीष्यन्ति।

ईशवीया तिथिः ९-१०-५७

श्रीमतां शिष्यः

शिवकुमार

अभ्यास

तुमको पिताजी के साथ जाना है, इस उद्देश्य से दो दिन का अवकाश लेने के लिए प्रधानाध्यापक को आवेदन-पत्र लिखो।



कविवरो रवीन्द्रः

भारतवर्षस्य आधुनिकेषु सर्वेषु कविषु श्रेष्ठः कवीन्द्रो रवीन्द्रः न केवलं भारते किन्तु जगतः सर्वेषु देशेषु परां प्रसिद्धिं महद् यशश्च प्राप्तवान् । सः साहित्ये, सङ्गीते कलायाञ्च अतीव निपुणः आसीत् । अनेन विरचितानां बह्वीनां कवितानामनेके संग्रहाः प्रकाशिताः सन्ति । ईशवीये त्रयोदशाधिकैकोनविंशति- १९१३. तमे वर्षे अस्य कतिपयानां कवितानां संग्रहः गीताञ्जलिनाम्ना प्रकाशितोऽभूत् । तस्य आंग्लभाषायामनुवादोऽपि सत्वरं जातः । विदेशीयाः कवयः विद्वांसश्च ताः कविताः पठित्वा विस्मयेन विमुग्धा इवाभूवन् । विश्वस्य सर्वोत्तमासु कृतिषु दीयमानः 'नोबेलपुरस्कारः' गीताञ्जलिम् उद्दिश्य विदेशीयैः अस्मै प्रदत्तः । तदानीन्तनेन शासनेनापि बहुसम्मानसूचकेन 'सर' इत्युपाधिना अयमलंकृतः । इत्थम् एकस्यैव ग्रन्थस्य प्रकाशनेन देशे विदेशे चास्य विपुलं यशः प्रासरत् ।

अस्य जन्म 'कलकत्ता' नगरस्यैकस्मिन् शिक्षिते सम्पन्ने च कुले समभवत् । अस्य पिता देवेन्द्रनाथ अत्यन्तं धार्मिकः आसीदत एव जनाः तं प्रेम्णा महर्षिपदव्या अलमकुर्वन् । बाल्यादेवास्य मनो रम्यासु नदीषु वनस्थलीषु च सविशेषं रमते स्म । विश्ववन्द्यः महात्मा गान्धिः एनं गुरुम् अमन्यत ।

अनेन निर्मिताः ग्रन्थाः परीक्षासु निर्धारिताः सन्ति । शान्तिनिकेतननाम्नी अस्य संस्था बोलपुरनामके स्थाने विद्यते यत्र विद्याव्यसनिनः भारतीयाः विदेशीयश्च ज्ञानार्जनं कुर्वन्ति ।

विद्यया मनुष्यो विश्वविख्यातो भवति । यूयमपि जन्मभूमेः भारतस्य गौरवाय परिश्रमेण विद्यां पठत ।

अभ्यास

कतिपयानाम्, तदानीन्तनशासनेन, सत्वरं, विपुलं, सविशेषम्, इन शब्दों का संस्कृत में अर्थ लिखो ।

संस्कृत में अनुवाद करो :—

साहित्य-संगीत-कला-विहीनः
साक्षात् पशुः पुच्छ-विषाण-हीनः ।
तृणं न खादन्नपि जीवमान—
स्तद् भागधेयं परमं पशूनाम् ॥

टि०—भागधेयम्—भाग्यम् । विषाणः—शृङ्गम् ।

—:०:—

पुरा वाराणस्यां ब्रह्मदत्तो नाम राजासीत्। तस्य राज्यकाले भगवान् बोधिसत्वः ब्राह्मणकुले अजायत। तस्य एका पत्नी तिस्त्रः कन्याश्चासन्। अथ काले मृतो बोधिसत्त्वः जन्मान्तरे सुवर्णमयो हंसः जातः। अथैकदा जन्मान्तरीयायाः कुटुम्बिन्याः दुःखमवगम्य तस्याः क्लेशं मोचयितुं सः तद्गृहं गतवान्। अथ तस्यै सः प्रतिदिनं पिच्छमेकं प्रदत्तवान्। अथैकदा ब्राह्मणी व्यचिन्तयत् को विश्वासः पक्षिषु ? यदि कदापि सः आगमनेन विमुखः भवति तदा किं करिष्यामि भवतु-सर्वाणि पिच्छानि अहमेकवारमेव गृह्णामि। एवं चिन्तयन्त्या तया हंसस्य सर्वाणि पिच्छानि उत्पाटितानि। अहो! किमाश्चर्यम्। सर्वाणि तानि पिच्छानि हिरण्मयानि नासन्। दुःखिता ब्राह्मणी पश्चात्तापमकरोत्। हंसस्तु न कदापि पुनस्तत्रागतः।

अभ्यास

चिन्तयन्ती, अवगम्य, पिच्छम्, उत्पाटितानि।

सन्धि करो—

पिच्छानि——उत्पाटितानि, सदा—एव।

हिन्दी में अनुवाद करो—

अथ तस्य सः—पुनस्तत्रागतः।

मातापितरौ

पिता स्वर्गः पिता धर्मः पिता हि परमं तपः ।
पितरि प्रीतिमापन्ने प्रीयन्ते सर्वदेवताः ॥१॥
पितुरप्यधिका माता गर्भधारणपोषणात् ।
अतो हि त्रिषु लोकेषु नास्ति मातृसमो गुरुः ॥२॥
भूमेर्गरीयसी माता स्वर्गादुच्चतरः पिता ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ॥३॥

विद्या

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥१॥
विद्वत्त्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥२॥
रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥३॥

दुर्जनः

दुर्जनः परिहर्त्तव्यो विद्यायालंकृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥१॥
दुर्जनेन समं वैरं प्रीतिञ्चापि न कारयेत् ।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥२॥

सर्पः क्रूरः खलः क्रूरः सर्पात् क्रूरतरः खलः ।
मन्त्रौषधिवशः सर्पः खलः केन निवार्यते ॥३॥

परोपकारः

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥१॥
धनानि जीवितञ्चैव परार्थे प्राज्ञ उत्सृजेत् ।
सन्निमित्ते वरं त्यागो विनाशे नियमे सति ॥२॥

भवन्ति नम्रास्तरवः फलोद्गमै—
र्नवाम्बुभिर्भूरि विलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥३॥

सत्यम्

नहि सत्यात् परो धर्मस्त्रिषु लोकेषु विद्यते ।
पापं मिथ्यासमं नास्ति तस्मात् सत्यं सदा वद् ॥१॥
सत्यहीना वृथा पूजा सत्यहीनो जपो वृथा ।
सत्यहीनन्तपो व्यर्थंमूसरे वपनं यथा ॥२॥
अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥३॥

मित्रम्

न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
व्यवहारेण जायन्ते मित्राणि रिपवस्तथा ॥१॥
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥२॥
एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्वमन्यद्धि गच्छति ॥३॥

अभ्यास

गरीयसी, विशालकुलसम्भवाः, किंशुकाः, विशिष्यते, निधने, परिहर्त्तव्यः, भूरिविलम्बिनः ।

संस्कृत में उत्तर दो—

(१) सर्वदेवताः कथं प्रीयन्ते ?

(२) माता पितुः अपि अधिका केन हेतुना भवति ?

(३) धर्मः सुखञ्च कथं लभ्यते ?

(४) विद्यायाः के लाभाः ?

(५) केन समं पापं नास्ति ?

(६) कीदृशं मित्रं परिवर्जयेत् ?

(७) कः एक एव सुहृत् ?

(८) प्राज्ञः परार्थे किमुत्सृजेत् ?

(९) परोपकारिणां कीदृशः स्वभावः ?

इस पाठ के श्लोकों को कण्ठस्थ करो ।

——

व्याकरणम्

(१) पिछली कक्षा में तुम पढ़ चुके हो कि किस प्रकार क्रमशः ह्रस्व अथवा दीर्घ अ, इ, उ, ऋ, को पुनः क्रमशः ह्रस्व अथवा दीर्घ अ, इ, उ, ऋ से संयोग होने पर दोनों के स्थान में एक दीर्घ स्वर लिखा और बोला जाता है।

(२) आ या अ के अनन्तर ह्रस्व अथवा दीर्घ इ के संयोग में ए, अ और उ के संयोग में ओ और अ तथा ऋ के संयोग में अर् हो जाता है। नीचे कुछ उदाहरण तुम्हारी परीक्षा और आवृत्ति के लिए लिखे हैं। इनमें नियमानुकूल विच्छेद और संयोग करो—

(१) विधूदयः, सर्वोदयः, श्रीशः, कृष्णावतारः
मातृणाम्, देवेन्द्रः, चरणोदकम् सकलर्द्धिः।

(२) कैटभ+अरिः, सु+उक्तम्, कवि+इन्द्रः, राम+ईशः।
गङ्गा+उक्तम्, देव+ऋषिः

यहाँ तुमको स्वरसन्धि के कुछ और नये नियम बताये जाते हैं।

निम्नांकित उदाहरणों को ध्यान से पढ़ो और तब नियम बताओ—

तव+एव=तवैव — विपुल+ऐश्वर्यम्=विपुलैश्वर्यम्
तथा+एव=तथैव — सेना+ऐक्यम्=सेनैक्यम्
तव+ओदनम्=तवौदनम् — गङ्गा+ओघ=गङ्गौघः
परम+औदार्यम्=परमौदार्यम् — महा+औषधम्=महौषधम्

इन उदाहरणों के आधार पर नियम ज्ञात हुआ—

१. वृद्धिरेचि—

अ अथवा आ + ए अथवा ऐ = ऐ ।
अ अथवा आ + ओ अथवा औ = औ ।

सन्धि करो—एक + एकम्, मम + ओष्ठः, चित्त + औदार्यम्, तस्य + एते, मत + ऐक्यम्, महा + ओषधिः ।

सन्धि-विच्छेद करो—महौजसः, देवैश्वर्यम्, आगम्येतत्, कृष्णौत्कण्ठ्यम् ।

अब इन शब्दों पर ध्यान दो—

अति + आचारः = अत्याचारः । नदी + अम्बु = नद्यम्बु ।
सु + आगतम् = स्वागतम् । वधू + औदार्यम् = वध्वौदार्यम् ।
पितृ + आदेशः = पित्रादेशः । लृ + आकृतिः = लाकृतिः ।

इनके आधार पर नियम होगा—

२. इकोयणचि—

(१) इ या ई के अनन्तर इनसे भिन्न कोई भी स्वर वर्ण हो तो इ या ई के स्थान में य्,

(२) उ या ऊ के अनन्तर इनसे भिन्न कोई स्वर वर्ण हो तो उ या ऊ के स्थान में व्,

(३) ऋ या ॠ के अनन्तर इनसे भिन्न कोई स्वर वर्ण हो तो ऋ या ॠ के स्थान में र् और

(४) ऌ के अनन्तर ऌ से भिन्न कोई स्वर वर्ण हो तो ऌ के स्थान में ल् हो जाता है ।

सन्धि करो और रूप लिखो—

प्रति + एकम् । गौरी + एषा । मधु + इदम् ।
सरयू + अम्बु । पितृ + अनुमति । लृ + अग्रे ।

सन्धि-विच्छेद करो—

अभ्युदयः, सुध्युपास्यः, पचत्वोदनम्, द्वात्रिंशः ।

अब इन उदाहरणों पर ध्यान दो—

जे + अति = जयति ।
नै + अकः = नायकः ।
भो + अनम् = भवनम् ।

शे + अनम् = शयनम्
रै + आ = राया ।
पो + अकः = पावकः ।

इनसे स्पष्ट होता है—

१. एचोऽयवायावः—

ए + कोई स्वर वर्ण = अय + स्वर वर्ण
ऐ + कोई स्वर वर्ण = आय् + स्वर वर्ण
ओ + कोई स्वर वर्ण = अव् + स्वर वर्ण
औ + कोई स्वर वर्ण = आव् + स्वर वर्ण

सन्धि करो—चे + अनम् । श्रे + अनम् । भौ + अकः ।

विच्छेद करो—उभावपि । शयितम् । गायकः । तावुभौ ।

अथ पुल्लिङ्गशब्दरूपाणि

सखि (मित्र)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	सखा	सखायौ	सखायः
द्वितीया	सखायम्	सखायौ	सखीन्
तृतीया	सख्या	सखिभ्याम्	सखिभिः
चतुर्थी	सख्ये	सखिभ्याम्	सखिभ्यः
पञ्चमी	सख्युः	सखिभ्याम्	सखिभ्यः
षष्ठी	सख्युः	सख्योः	सखीनाम्
सप्तमी	सख्यौ	सख्योः	सखिषु
सम्बोधन	हे सखे !	हे सखायौ !	हे सखायः

कर्तृ (करनेवाला)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	कर्त्ता	कर्त्तारौ	कर्त्तारः
द्वितीया	कर्त्तारम्	कर्त्तारौ	कर्तॄन्
तृतीया	कर्त्रा	कर्तृभ्याम्	कर्तृभिः
चतुर्थी	कर्त्रे	कर्तृभ्याम्	कर्तृभ्यः
पञ्चमी	कर्तुः	कर्तृभ्याम्	कर्तृभ्यः
षष्ठी	कर्तुः	कर्त्रोः	कर्तॄणाम्
सप्तमी	कर्त्तरि	कर्त्रोः	कर्तृषु
सम्बोधन	हे कर्त्तः !	हे कर्त्तारौ !	हे कर्त्तारः !

भगवत् (ईश्वर)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	भगवान्	भगवन्तौ	भगवन्तः
द्वितीया	भगवन्तम्	भगवन्तौ	भगवतः
तृतीया	भगवता	भगवद्भ्याम्	भगवद्भिः
चतुर्थी	भगवते	भगवद्भ्याम्	भगवद्भ्यः
पञ्चमी	भगवतः	भगवद्भ्याम्	भगवद्भ्यः
षष्ठी	भगवतः	भगवतोः	भगवताम्
सप्तमी	भगवति	भगवतोः	भगवत्सु
सम्बोधन	हे भगवन् !	हे भगवन्तौ !	हे भगवन्तः !

अथ स्त्रीलिङ्ग शब्दरूपाणि

वधू (बहू)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	वधूः	वध्वौ	वध्वः
द्वितीया	वधूम्	वध्वौ	वधूः
तृतीया	वध्वा	वधूभ्याम्	वधूभिः
चतुर्थी	वध्वै	वधूभ्याम्	वधूभ्यः

पञ्चमी	वध्वाः	वधूभ्याम्	[वधूभ्यः
षष्ठी	वध्वाः	वध्वोः	वधूनाम्
सप्तमी	वध्वाम्	वध्वोः	वधूषु
सम्बोधन	हे वधू !	हे वध्वौ !	हे वध्वः !

मातृ (माता)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	माता	मातरौ	मातरः
द्वितीया	मातरम्	मातरौ	मातॄः
तृतीया	मात्रा	मातृभ्याम्	मातृभिः
चतुर्थी	मात्रे	मातृभ्याम्	मातृभ्यः
पञ्चमी	मातुः	मातृभ्याम्	मातृभ्यः
षष्ठी	मातुः	मात्रोः	मातॄणाम्
सप्तमी	मातरि	मात्रोः	मातृषु
सम्बोधन	हे मातः !	हे मातरौ !	हे मातरः !

अथ नपुंसकलिङ्गशब्दरूपाणि

शर्मन् (कल्याण, सुख)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	शर्म	शर्मणी	शर्माणि
द्वितीया	शर्म	शर्मणी	शर्माणि
तृतीया	शर्मणा	शर्मभ्याम्	शर्मभिः
चतुर्थी	शर्मणे	शर्मभ्याम्	शर्मभ्यः
पञ्चमी	शर्मणः	शर्मभ्याम्	शर्मभ्यः
षष्ठी	शर्मणः	शर्मणोः	शर्मणाम्
सप्तमी	शर्मणि	शर्मणोः	शर्मसु
सम्बोधन	हे शर्मन् !	हे शर्मणी !	हे शर्माणि !

वारि (जल)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	वारि	वारिणी	वारीणि
द्वितीया	वारि	वारिणी	वारीणि
तृतीया	वारिणा	वारिभ्याम्	वारिभिः
चतुर्थी	वारिणे	वारिभ्याम्	वारिभ्यः
पञ्चमी	वारिः	वारिभ्याम्	वारिभ्यः
षष्ठी	वारिणः	वारिणोः	वारीणाम्
सप्तमी	वारिणि	वारिणोः	वारिषु
सम्बोधन	हे वारे, वारि !	हे वारिणी	हे वारीणि

वाच् (वाणी)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	वाक्, वाग्	वाचौ	वाचः
द्वितीया	वाचम्	वाचौ	वाचः
तृतीया	वाचा	वाग्भ्याम्	वाग्भिः
चतुर्थी	वाचे	वाग्भ्याम्	वाग्भ्यः
पञ्चमी	वाचः	वाग्भ्याम्	वाग्भ्यः
षष्ठी	वाचः	वाचोः	वाचाम्
सप्तमी	वाचि	वाचोः	वाक्षुः
सम्बोधन	हे वाक्, वाग्	हे वाचौ !	हे वाचः !

पयस् (दूध)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	पयः	पयसी	पयांसि
द्वितीया	पयः	पयसी	पयांसि
तृतीया	पयसा	पयोभ्याम्	पयोभिः
चतुर्थी	पयसे	पयोभ्याम्	पयोभ्यः
पञ्चमी	पयसः	पयोभ्याम्	पयोभ्यः

षष्ठी	पयसः	पयसाः	पयसाम्
सप्तमी	पयसि	पयसोः	पयस्सु
सम्बोधन	हे पयः !	हे पयसी !	हे पयांसि !

पुल्लिङ्ग सर्वनाम संज्ञक शब्द

सर्व (सव)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	सर्वः	सर्वौ	सर्वे
द्वितीया	सर्वम्	सर्वौ	सर्वान्
तृतीया	सर्वेण	सर्वाभ्याम्	सर्वैः
चतुर्थी	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
पञ्चमी	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
षष्ठी	सर्वस्य	सर्वयोः	सर्वेषाम्
सप्तमी	सर्वस्मिन्	सर्वयोः	सर्वेषु

सर्वनाम शब्दों का सम्बोधन नहीं होता ।

स्त्रीलिङ्ग

सर्व (शब्द)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	सर्वा	सर्वे	सर्वाः
द्वितीया	सर्वाम्	सर्वे	सर्वाः
तृतीया	सर्वया	सर्वाभ्याम्	सर्वाभिः
चतुर्थी	सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः
पञ्चमी	सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः
षष्ठी	सर्वस्याः	सर्वयोः	सर्वासाम्
सप्तमी	सर्वस्याम्	सर्वयोः	सर्वासु

नपुंसकलिंग 'सर्व' शब्द

प्रथमा	सर्वम्	सर्वे	सर्वाणि
द्वितीया	सर्वम्	सर्वे	सर्वाणि

आगे की विभक्तियों में पुंल्लिङ्ग के समान रूप होंगे।

पुल्लिङ्ग 'किम्' (कौन या क्या)

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	कः	कौ	के
द्वितीया	कम्	कौ	कान्
तृतीया	केन	काभ्याम्	कैः
चतुर्थी	कस्मै	काभ्याम्	केभ्यः
पञ्चमी	कस्मात्	काभ्याम्	केभ्यः
षष्ठी	कस्य	कयोः	केषाम्
सप्तमी	कस्मिन्	कयोः	केषु

स्त्रीलिङ्ग 'किम्' शब्द

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	का	के	काः
द्वितीया	काम्	के	काः
तृतीया	कया	काभ्याम्	काभिः
चतुर्थी	कस्यै	काभ्याम्	काभ्यः
पञ्चमी	कस्याः	काभ्याम्	काभ्यः
षष्ठी	कस्याः	कयोः	कासाम्
सप्तमी	कस्याम्	कयोः	कासु

नपुंसकलिङ्ग 'किम्' शब्द

प्रथमा	किम्	के	कानि
द्वितीया	किम्	के	कानि

आगे की विभक्तियों में पुंल्लिङ्ग के समान रूप बनेंगे।

'एक' शब्द के रूप एकवचन में, 'द्वि'शब्द के रूप द्विवचन में तथा 'त्रि' और इसके अधिक संख्या-वाचक शब्दों के रूप प्रायः बहुवचन में होते हैं।

एक (एक)

विभक्ति	पुल्लिङ्ग	स्त्रीलिङ्ग	नपुंसकलिङ्ग
प्रथमा	एकः	एका:	एकम्
द्वितीया	एकम्	एकाम्	एकम्
तृतीया	एकेन	एकया	एकेन
चतुर्थी	एकस्मै	एकस्यै	एकस्मै
पञ्चमी	एकस्मात्	एकस्याः	एकस्मात्
षष्ठी	एकस्य	एकस्याः	एकस्य
सप्तमी	एकस्मिन्	एकस्याम्	एकस्मिन्

द्वि (दो)

विभक्ति	पुल्लिङ्ग	स्त्रीलिङ्ग	नपुंसकलिङ्ग
प्रथमा	द्वौ	द्वे	द्वे
द्वितीया	द्वौ	द्वे	द्वे
तृतीया	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
चतुर्थी	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
पञ्चमी	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
षष्ठी	द्वयोः	द्वयोः	द्वयोः
सप्तमी	द्वयोः	द्वयोः	द्वयोः

त्रि (तीन)

विभक्ति	पुल्लिङ्ग	स्त्रीलिङ्ग	नपुंसकलिङ्ग
प्रथमा	त्रयः	तिस्रः	त्रीणि
द्वितीया	त्रीन्	तिस्रः	त्रीणि
तृतीया	त्रिभिः	तिसृभिः	त्रिभिः

चतुर्थी	त्रिभ्यः	तिसृभ्यः	त्रिभ्यः
पञ्चमी	त्रिभ्यः	तिसृभ्यः	त्रिभ्यः
षष्ठी	त्रयाणाम्	तिसृणाम्	त्रयाणाम्
सप्तमी	त्रिषु	तिसृषु	त्रिषु

अथ धातुरूपाणि

दा धातु (देना)

वर्तमान—लट्

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	ददाति	दत्तः	ददति
मध्यम पुरुष	ददासि	दत्थः	दत्थ
उत्तम पुरुष	ददामि	दद्वः	दद्मः

आज्ञा अर्थ—लोट्

प्रथम पुरुष	ददातु	दत्ताम्	ददतु
मध्यम पुरुष	देहि	दत्तम्	दत्त
उत्तम पुरुष	ददानि	ददाव	ददाम

इच्छा अर्थ—विधिलिङ्

प्रथम पुरुष	दद्यात्	दद्याताम्	दद्युः
मध्यम पुरुष	दद्याः	दद्यातम्	दद्यात
उत्तम पुरुष	दद्याम्	दद्याव	दद्याम

सामान्य भविष्यत्—लृट्

प्रथम पुरुष	दास्यति	दास्यतः	दास्यन्ति
मध्यम पुरुष	दास्यसि	दास्यथः	दास्यथ
उत्तम पुरुष	दास्यामि	दास्यावः	दास्यामः

अनद्यतन भूत—लङ्

प्रथम पुरुष	अददात्	अदत्ताम्	अददुः
मध्यम पुरुष	अददाः	अदत्तम्	अदत्त
उत्तम पुरुष	अददाम्	अदद्व	अदद्म

'प्रच्छ' धातु (पूछना)

वर्तमान लट्

प्रथम पुरुष	पृच्छति	पृच्छतः	पृच्छन्ति
मध्यम पुरुष	पृच्छसि	पृच्छथः	पृच्छथ
उत्तम पुरुष	पृच्छामि	पृच्छावः	पृच्छामः

आज्ञा अर्थ—लोट्

प्रथम पुरुष	पृच्छतु	पृच्छताम्	पृच्छन्तु
मध्यम पुरुष	पृच्छ	पृच्छतम्	पृच्छत
उत्तम पुरुष	पृच्छानि	पृच्छाव	पृच्छाम

इच्छा अर्थ-विधिलिङ

प्रथम पुरुष	पृच्छेत्	पृच्छताम्	पृच्छेयुः
मध्यम पुरुष	पृच्छेः	पृच्छेतम्	पृच्छेत
उत्तम पुरुष	पृच्छेयम्	पृच्छेव	पृच्छेम

सामान्य भविष्यत्—लृट

प्रथम पुरुष	प्रक्ष्यति	प्रक्ष्यतः	प्रक्ष्यन्ति
मध्यम पुरुष	प्रक्ष्यसि	प्रक्ष्यथः	प्रक्ष्यथ
उत्तम पुरुष	प्रक्ष्यामि	प्रक्ष्यावः	प्रक्ष्यामः

अनद्यतन भूत—लङ्

प्रथम पुरुष	अपृच्छत्	अपृच्छताम्	अपृच्छन्
मध्यम पुरुष	अपृच्छः	अपृच्छतम्	अपृच्छत्
उत्तम पुरुष	अपृच्छम्	अपृच्छाव	अपृच्छाम

'गम्' धातु [जाना]

वर्तमान-लट्

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	गच्छति	गच्छतः	गच्छन्ति
मध्यम पुरुष	गच्छसि	गच्छथः	गच्छथ
उत्तम पुरुष	गच्छामि	गच्छावः	गच्छामः

आज्ञा अर्थ—लोट्

प्रथम पुरुष	गच्छतु	गच्छताम्	गच्छन्तु
मध्यम पुरुष	गच्छ	गच्छतम्	गच्छत्
उत्तम पुरुष	गच्छानि	गच्छाव	गच्छाम

इच्छा अर्थ—विधिलिङ

प्रथम पुरुष	गच्छेत्	गच्छेताम्	गच्छेयुः
मध्यम पुरुष	गच्छेः	गच्छेतम्	गच्छेत
उत्तम पुरुष	गच्छेयम्	गच्छेव	गच्छेम

सामान्य भविष्यत्—लृट्

प्रथम पुरुष	गमिष्यति	गमिष्यतः	गमिष्यन्ति
मध्यम पुरुष	गमिष्यसि	गमिष्यथः	गमिष्यथ
उत्तम पुरुष	गमिष्यामि	गमिष्यावः	गमिष्यामः

अनद्यतन भूत—लङ्

प्रथम पुरुष	अगच्छत्	अगच्छताम्	अगच्छन्
मध्यम पुरुष	अगच्छः	अगच्छतम्	अगच्छत
उत्तम पुरुष	अगच्छम्	अगच्छाव	अगच्छाम

'पा' धातु [पीना]

वर्तमान—लट्

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	पिबति	पिबतः	पिबन्ति
मध्यम पुरुष	पिबसि	पिबथः	पिबथ
उत्तम पुरुष	पिबामि	पिबावः	पिबामः

आज्ञा अर्थ—लोट्

प्रथम पुरुष	पिबतु	पिबताम्	पिबन्तु
मध्यम पुरुष	पिब	पिबतम्	पिबत
उत्तम पुरुष	पिबानि	पिबाव	पिबाम

इच्छा अर्थ—विधि लिङ्

प्रथम पुरुष	पिबेत्	पिबेताम्	पिबेयुः
मध्यम पुरुष	पिबेः	पिबेतम्	पिबेत
उत्तम पुरुष	पिबेयम्	पिबेव	पिबेम

सामान्य भविष्यत्—लृट्

प्रथम पुरुष	पास्यति	पास्यतः	पास्यन्ति
मध्यम पुरुष	पास्यसि	पास्यथः	पास्यथ
उत्तम पुरुष	पास्यामि	पास्यावः	पास्यामः

अनद्यतनभूत—लङ्

प्रथम पुरुष	अपिबत्	अपिबताम्	अपिबन्
मध्यम पुरुष	अपिबः	अपिबतम्	अपिबत
उत्तम पुरुष	अपिबम्	अपिबाव	अपिबाम

कारक-प्रकरणम्

छठीं कक्षा में तुमने कारक तथा विभक्तियों के प्रयोग के सम्बन्ध में जो नियम सीखे थे, उनकी आवृत्ति 'उत्तमः छात्रः' शीर्षक पाठ में विशेष रूप से कराई गई है। अन्य पाठों में भी अनेक उदाहरण आये हैं। उन समस्त उदाहरणों पर ध्यान दो और यहाँ संक्षिप्त रूप से दिये जाने वाले नियमों की अनुकूलता पर विचार करो। अनुवाद करते समय इस बात पर विशेष ध्यान दो कि जिस विभक्ति का शब्द के साथ तुम प्रयोग कर रहे हो, वहाँ वह विभक्ति कारक के इन नियमों के अनुकूल है या नहीं—

प्रथमा

(१) अभिधेयमात्रे—किसी भी विशेष्यवाची शब्द को संस्कृत में सामान्य रूप से कहने पर प्रथमा विभक्ति होती है, जैसे—पटः, घटः आदित्यः, पुस्तकम्।

(२) कर्त्तरि—कर्त्ता में, यथा—बालिका नृत्यति, अश्वः गच्छति।

(३) अव्यययोगे—'इति', 'नाम' इत्यादि अव्यय शब्दों के साथ; यथा—युधिष्ठिरो नाम राजा। रामः इति तस्य संज्ञा।

(४) उक्ते कर्मणि—अर्थात् जहाँ किसी प्रत्यय के द्वारा कर्म उक्त हो जाता है, वहाँ कर्म में प्रथमा होती है, जैसे—पुण्येन दृष्टो हरिः। बाणेन हतो बाली।

(५) सम्बोधने—हे राम मामुद्धर।

द्वितीया

(१) कर्मणि—अहं दुग्धं पिबामि, हरिं भजामि ।

(२) उप, अनु, अधि और आङ् उपसर्ग के साथ 'वस्' धातु के प्रयोग में—हरिः वैकुण्ठम् उपवसति, अनुवसति, अधिवसति ।

(३) अभि, नि उपसर्ग के साथ विश् धातु के प्रयोग में—रामम् अभिनिविशते मनः ।

(४) अभि उपसर्ग के साथ शी, स्था और अस् धातु के प्रयोग में जैसे—शिवः कैलासमधिशेते अधितिष्ठति अध्यास्ते वा ।

(५) समय और मार्ग के अत्यन्त संयोग अर्थात् पूरे समय और समस्त मार्ग का अर्थ निकलने पर द्वितीया होगी। जैसे—विप्रः मासम् अधीते । (पूरे महीने भर पढ़ता है), क्रोशं कुटिलो मार्गः । (रास्ता कोश भर तक टेढ़ा-मेढ़ा है) ।

(६) अभितः, परितः, सर्वतः उभयतः, अन्तरेण, यावत्, प्रति, अनु, धिक्, हा, निकषा इन शब्दों के प्रयोग में । ग्रामम् अभितो वनम् । दीनं प्रति दया उचिता इत्यादि ।

तृतीया

(१) अनुक्ते कर्त्तरि—कर्मवाच्य में कर्म तो प्रत्यय से उक्त हो जाता है, कर्त्ता अनुक्त रह जाता है, ऐसे कर्त्ता में तृतीया होगी—
वीरेण हतः सिंहः (वीरः सिंहं हतवान्) ।

(२) करणे—क्रिया की सिद्धि में जो सहायक होता है, उसे करण कहते हैं यथा—लेखन्या लिखति छात्रः ।

(३) सहार्थे—साथ का अर्थ बतलाने वाले शब्दों के प्रयोग में—बालकेन साकं, सह, सार्धं वा पिता गच्छति ।

(४) न्यूनता, निषेध और प्रयोजनवाची शब्दों के साथ, यथा—लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति, अलं महीपाल तव श्रमेण, कोऽर्थः पुत्रेण जातेन ।

(५) अंगविकारे—अक्ष्ण काणः, पादेन खञ्जः ।

(६) पहचान बतलाने वाले शब्दों के प्रयोग में, जैसे जटाभिः तपस्वी (प्रतीयते) ।

(७) तुल्यार्थक और हेतु अर्थवाले शब्दों के साथ—कृष्णेन तुल्यः, रामेण समानः, केन हेतुना सः गच्छति ।

चतुर्थी

(१) सम्प्रदाने—अर्थात् दे देने के अर्थ में, विप्राय धनं ददाति, गुरवे गां ददाति, शिशवे मोदकं ददाति ।

(२) रुच्यर्थक धातु के योग में—जिसको चीज अच्छी लगेगी उसको बतलाने वाले शब्द के साथ चतुर्थी होगी—यथा, बालकाय मोदकं रोचते ।

(३) कर्जा देनेवाला उत्तमर्ण कहा जाता है । उसमें चतुर्थी का प्रयोग होगा, यदि क्रिया धारयति या इसी के अन्य रूपों में होगी । वृक्षसेचने द्र धारयति मे, अहं तुभ्यं शतं धारयामि ।

(४) किसी वस्तु को कामना करने में स्पृह धातु का प्रयोग होता है । यथा-यशसे धनाय वा स्पृह्यति ।

(५) क्रोध, द्रोह, ईर्ष्या, असूया (निन्दा) अर्थ में जिसके प्रति क्रोधादि हो उसमें—सः मह्यं क्रुध्यति, द्रुह्यति ।

(६) निमित्त अर्थ में—जैसे स्नानाय नदीं गच्छति ।

(७) नमः, स्वस्ति, स्वाहा, स्वधा, अलं, वषट् इन शब्दों के योग में, देवेभ्यो नमः, इत्यादि ।

पञ्चमी

(१) अपादान में—अर्थात् किसी वस्तु का जिससे विभाग हो, उसमें पञ्चमी होती है—वृक्षात् पर्णः पतति ।

(२) भयहेतु में—भय के कारण में, यथा व्याघ्रात् भीतः ।

(३) जिससे ज्ञानादि प्राप्त हो, जिससे कोई वस्तु पैदा हो या निकले ऐसे स्थलों में पञ्चमी होती है, यथा-उपाध्यायादधीते विद्याम्, ब्रह्मणः प्रजायते प्रजा, हिमालयात् गङ्गा प्रभवति, इत्यादि ।

(४) जुगुप्सा, विराम और प्रमादार्थक धातुओं के योग में—यथा, पापात् जुगुप्सते विरमति वा धर्मात् ।

(५) अप, आङ्, परि इनके योग में—जैसे, आसमुद्रक्षितोशानाम् ।

(६) अन्यार्थक शब्दों के योग में यथा—परमेश्वरादन्यः को मा रक्षितुं समर्थः इत्यादि ।

(७) दूर और समीप अर्थबाची शब्दों के योग में, यथा—नगरात् दूरम्, ग्रामात् अन्तिकम् इत्यादि ।

(८) पृथक्, विना, नाना शब्दों के योग में, यथा—दिवाः गोः वत्सः मातुः पृथक् तिष्ठति । साहसात् विना श्रीर्नायाति ।

(९) अवधि, सीमा और ज्येष्ठता, श्रेष्ठता आदि के निर्धारण में; यथा-नगरात् दश क्रोशाः, दीपावल्याः नवमे दिवसे, स्वर्गादपि गरीयसी जननी ।

षष्ठी

(१) सम्बन्ध में—मम पुत्रः, देवदत्तस्य कन्या इत्यादि में ।

(२) हेतु प्रयोग में—कस्य हेतोः, इत्यादि ।

(३) कृत् प्रत्यय—तव्य, अनीयर आदि के योग में षष्ठी और तृतीया दोनों होती हैं—इदं मम मया वा करणीयम्। षष्ठी के अन्य प्रयोगों के लिए भाग १ का व्याकरण देखो।

सप्तमी

(१) आधार में—तिले तैलम्। दध्नि घृतम् इत्यादि।

(२) एक क्रिया के करने या होने से जो दूसरी प्रतिक्रिया हो उस अर्थ में, जैसे—उदिते रवौ कमलानि प्रकाशन्ते, खगाः कूजन्ति, इत्यादि।

(३) साधु और असाधु शब्द के प्रयोग में, यथा—पितरि साधुः मातरि असाधुः मोहनः—मोहन पिता के साथ अच्छा और माता के साथ बुरा व्यवहार करता है।

(४) अनादर अथवा अपेक्षा के भाव में, यथा—रुदति शिशौ माता गता (रोते हुए बच्चे की उपेक्षा कर माँ चली गयी)।

(५) दो या बहुतों में एक की श्रेष्ठता का निश्चय करना—गवां गोषु वा कृष्णा गौः बहु दुग्धं ददाति। ऐसे स्थल में षष्ठी, सप्तमी दोनों होती हैं।

प्रमुख वितरक

हिन्दी प्रचारक संस्थान

(व्यवस्था : कृष्णचन्द्र बेरी एण्ड सन्स)

पोस्ट बॉक्स नं. १०६, बी. २१/३०, पिशाचमोचन, वाराणसी-१

मूल्य : ४८ पैसे मात्र

क. मुद्रक । विद्यामन्दिर प्रेस (प्रा.) लि., मानमन्दिर, वाराणसी-१